अष्टमः पटलः ॥ इति भट्टरुद्रदत्तप्रणीतायामापस्तम्बसूत्रवृत्तौ सूत्रदीपिकायां पञ्चमः प्रश्नस्समाप्तः ॥

अग्न्याधेयानन्तरमग्निहोत्रं व्याचिख्यासुरधिकारं दर्शयति । अग्निहोत्रं स्यामः—अग्निहोत्रशब्दः कर्मनामधेयः अग्नेर्होत्रमस्मिन्निति होमेऽग्नि-

देवतासम्बन्धात् । यथोक्तं ब्राह्मणे—स एतत् भागधेयमभ्यजायत, यदग्निहोत्रम्, तस्मादग्निहोत्रमुच्यत इति । क्वचिद्द्रव्यवचनोऽपि । यथा-अधिश्रित्याग्निहोत्रम् । यस्याग्निहोत्रं दुह्यमानमित्यादौ अधिवृ . इति ।

* * * *

यस्मिन्नेवर्तौ निष्पद्यन्ते तस्मिन्नेव यजेतेत्यर्थः ॥

इति भट्टरुद्रदत्तप्रणीतायामापस्तम्बसूत्रवृत्तौ सूत्रदीपिकायां षष्ठः प्रश्नः ॥

सर्वान् . यति । अथ नित्यः पशुरारभ्यते—यस्मिन् कर्मणि यज्ञार्थं पशुर्बध्यते स पशुबन्धः तेनेष्टवान् पशुबन्धयाजी । सर्वान् लोकानभिजयति ।

* * * *

अष्टमः पटलः ॥ इति . . . . सप्तमः प्रश्नस्समाप्तः ॥

नित्यत्वसामान्याद्धविर्यज्ञसामान्याच्चातुर्मास्यानि व्याचष्टे—

* * * *

आपस्तम्बसूत्रवृत्तौ . . . . अष्टमः प्रश्नः ॥ उक्तानि सोमादर्वाङ्नित्यानि कर्माणि यानि[ह] हविर्यज्ञप्रकृतिरा(मा)चख्युराचार्याः ॥

* * * *

नवमः प्रश्नः ॥

उक्ता हविर्यज्ञाः उक्तानि चैषां प्रायश्चित्तानि । अथेदानीं सोम आरभ्यते—सोमोऽपि नित्यः ।

* * * *

इति भट्टरुद्रदत्तप्रणीतायामापस्तम्बसूत्रदीपिकायां दशमः प्रश्नः ॥

आतिथ्या . प्रतिमन्त्रं तनूनपात्सम्बन्धात्तानूनप्त्रमित्याज्यसमाख्या ॥

* * * *

इति भट्टरुद्रदत्तप्रणीतायामापस्तम्बसूत्रवृत्तौ दीपिकायामेकादशः प्रश्नः ॥

महारा . मृशति । महती रात्रिः महारात्रिः रात्रिशब्देन चरम-त्रिभागो लक्ष्यते ।

*   *   *   *

इति . . . . . द्वादशप्रश्नः ॥

अभिषवा . तायते । अभिषवादि महाभिषवादि तस्य . व्याख्यातः ॥

End:

पञ्चमः पटलः । अवभृथस्य . मयति बर्हिराहरणादितन्त्रं प्रक्रमयति । वेदिपक्षे परिस्तरणाद्यवेदिपक्षे नेध्मो भवत्युभयत्र . . . विवृत्तो . योक्त्रं विवृते विस्रंसयति ॥

No. 1063. आपस्तम्बश्रौतसूत्रवृत्तिः.

ĀPASTAMBAŚRAUTASŪTRAVṚTTIḤ.

Substance, paper. Size, 6½ × 8⅜ inches. Pages, 80. Lines, 16 on a page. Character, Telugu. Condition, good. Appearance, new. Copied for the Library in 1895.

Begins on fol. 73*a*. The other works herein are Śāṭhyāyanasūtra 1*a*, Āpastambagṛhyasūtrabhāṣya 9*a*, Sōmahautra 113*a*, and Ādhānaprayōga 189*b*.

The commentary of Bhaṭṭarudra on the Śrautasūtra; from the 13th Sūtra of the 25th Khaṇḍa of the 12th Praśna to the end of the 13th Praśna. The colophon runs as follows:

इति भट्टरुद्रप्रणीतायाम् आपस्तम्बसूत्रवृत्तौ दीपिकायां त्रयोदश प्रश्नः ॥

No. 1064. आपस्तम्बसूत्रवृत्तिः.

ĀPASTAMBASŪTRAVṚTTIḤ.

Substance, palm-leaf. Size, 17 × 1⅜ inches. Pages, 226. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Contains the commentary of Ahōbilasūri, son of Nṛsiṁhayajvan and pupil of Śaṅkarānandatīrtha. The commentator is said to belong to the Samudrāla family, and he refers to the authors of a Bhāṣya, a Vṛtti and a Prayōgavṛitti. The commentary in this MS. extends up to the 4th Paṭala of the 4th Praśna, and concludes with the rules for the performance of the Darśapūrṇamāsa sacrifice.

Beginning:

नृसिंहं मायुतं पूर्णं सच्चिदानन्दविग्रहम् ।
नमामि प्रत्यगात्मानं विधातारं जगद्गुरुम् ॥ (१)
तातं नृसिंहयज्वानं नरकेसरिविग्रहम् ।
शङ्करानन्दतीर्थं च वन्दे ब्रह्मगुरुं तथा ॥ (२)
नृसिंहमन्त्रसामानि गायन्तुष्टो ममाग्रजः ।
यो जयत्यखिले लोके वन्दे मन्त्रगुरुं हृदि ॥ (३)
यत्प्रसादात् सुरगणाः कार्यसिद्धिप्रसाधकाः ।
वेदशाखाप्रवेद्यन्तं वन्दे तीर्थं विनायकम् ॥ (४)
आपस्तम्बमुनिश्रेष्ठं भाष्यवृत्तिकृतावपि ।
प्रयोगवृत्तिकारादीन् नमस्कुर्वे सदा हृदि ॥ (५)
आपस्तम्बीयसूत्रस्य वृत्तिर्भाष्यानुसारिणी ।
कृतये बालबोधाय गृह्णीयुर्वीतमत्सराः ॥ (६)
काल्पबुद्धिरहं कार्षं सूत्रं श्रुत्यर्थगोचरम् ।
तथापि चापलात्तूर्णं मन्मुखान्निस्सृताल्पगीः ॥ (७)
भाष्यादयो महाग्रन्थाः सन्ति श्रुत्यर्थगोचराः ।
गूढतात्पर्यतस्तेषां स्फुटा वृत्तिर्विधीयते ॥ (८)

तत्रादौ अधिकारो निर्णीयते । गृहस्थस्याग्न्याधेयादिकर्मस्वधिकारः गृहस्थमधिकृत्य यज्ञो याजनमित्यादिविधानात् । तत्र विदुषस्त्रैवर्णिकस्याधिकारः ।

* * * *

अथातो दर्शपूर्णमासौ व्याख्यास्यामः—अथशब्द आनन्तर्यार्थः। कस्यानन्तर्यम्? यज्ञं व्याख्यास्याम इत्यादियज्ञमात्रसामान्यरूपव्याख्यान-परिभाषानन्तर्यम्; सामर्थ्यात्, परिभाषामन्तरा विशेषरूपोत्तरशास्त्रस्य कर्तुमशक्यत्वात्। ननु यज्ञं व्याख्यास्याम इति परिभाषाया उत्तरत्रे-दानीमध्ययनात् तदानन्तर्यं दर्शपूर्णमासव्याख्यानस्यासङ्गतम्; उच्यते व्याख्यानसौकर्याय भाष्यकारादिभिरग्रे व्याख्यानात्। अन्ते अध्येतृभि-रधीयते तत्प्रणयं नत्वादावेवेति मन्तव्यम्॥

* * * *

Colophon:

श्रीमत्समुद्रालकुलतिलकश्रीमदहोबलभट्टोपाध्यायतनूभवस्य श्रीनृसिं-हयज्वनः पुत्रेणाहोबलसूरिणा विरचितायां याज्ञिकसर्वस्वाख्यायामापस्तम्बी-यसूत्रवृत्तौ तृतीयप्रश्ने षष्ठः पटलः। समाप्तः प्रश्नः॥

End:

पुरुषनियमाश्च ब्रह्मचर्यादयः कर्तव्याः पूर्वस्मिन् पयस्वतीरोषधय इति भोजनं कर्तव्यम्। विष्णुक्रमान् प्राचः क्रामति। प्राङुपेत्य गोमतीं जपति॥ चतुर्थः पटलः॥

इति श्रीमत्समुद्रालकुलतिलकश्रीमदहोबलभट्टमहोपाध्यायतनूभवस्य श्रीमन्नृसिंहयज्वनः पुत्रेण स्वयंप्रकाशयतिदेशिकपरम्पराप्राप्तविशिष्टेष्ट-देवतानुग्रहेण अहोबलसूरिणा विरचितायां याज्ञिकसर्वस्वाख्यायामापस्तम्बी-यसूत्रवृत्तौ साङ्गो दर्शपूर्णमासो निरूपितः॥

No. 1065. आपस्तम्बसूत्रध्वनितार्थकारिका.

ĀPASTAMBASŪTRADHVANITĀRTHAKĀRIKĀ.

Substance, palm-leaf (Śrītāla). Size, $5\frac{3}{4} \times 2\frac{3}{8}$ inches. Pages, 48. Lines, 17 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains 3 Khaṇḍas. The first leaf is numbered as 71, and the succeeding leaves are thereafter serially marked.

Begins on fol. 1*a*. The other work herein is Āpastambaśatadvayīvyākhyā 25*a*.

This work deals in verse with the rituals of the Sōma sacrifice. The author is Bhāskara Miśra, son of Kumārasvāmin, and bears the title of Trikāṇḍimaṇḍana.

Beginning:

श्रियं वागीश्वरीं देवीं संप्रणम्य विनायकम् ।
गुरुं च सोमयागस्य प्रयोगः प्रवितन्यते ॥
तत्राधिकारकालादि प्रथमं प्रतिपाद्यते ।
सूत्रान्तरमतं वक्ष्ये सोपयोगं क्वचित् क्वचित् ॥
प्रसङ्गादग्निहोत्रेष्टिपश्वाधानोपयोगि यत् ।
तत्रापि लेशतः किंचित् प्रवक्ष्ये तत्र तत्र च ॥
अधिकारास्त्रिधा नित्यकाम्यनैमित्तिकत्वतः ।
ते च श्रुतार्थवादेच्छाकल्पत्वेन त्रिधा पुनः ॥
आधानं नित्यमेवेष्टं पितृयज्ञोऽपि तादृशः ।
कैश्चिन्मीमांसकैः काम्य(:)पितृयज्ञो निरूपितः ॥
पितृयज्ञस्य चाङ्गत्वमापस्तम्बेन दूषितम् ।
साधितं च भरद्वाजसूत्रभाष्यकृता श्रुतेः ॥

* * * *

इति श्रीविद्यामदमत्ततत्तद्वादीन्द्रमतङ्गजविदारणैकपञ्चाननस्य श्रीकुमारस्वामिसुतत्रिकाण्डमण्डनभास्करमिश्रसोमयाजिनः कृतावापस्तम्बसूत्रध्वनितार्थकारिकासु सोमयागोपोद्घाते अधिकारनिरूपणम् ॥

* * * *

इति श्रीकुमारस्वामिसूरिसुतत्रिकाण्डिमण्डनभास्करमिश्रसोमयाजिकृतावापस्तम्बसूत्रध्वनितार्थकारिकासु प्रतिनिधिनिरूपणं द्वितीयं काण्डम् ॥

End :

निरूपितं विशेषेणान्यत् ग्रन्थान्तरे भवेत्।
त्रिकाण्डिमण्डनमिति कर्तृद्वाराभिधानधीः ॥

इति श्रीपदवाक्यप्रमाणज्ञश्रीकुमारस्वामिसुतत्रिकाण्डिमण्डनभास्करमिश्रसोमयाजिकृतायामापस्तम्बसूत्रध्वनितार्थकारिकायां पुनराधानप्रकरणं तृतीयकाण्डम् ॥

No. 1036. आपस्तम्बश्रौतसूत्रव्याख्यानम्.

ĀPASTAMBAŚRAUTASŪTRAVYĀKHYĀNAM.

Substance, paper. Size, $12\frac{1}{2} \times 7\frac{7}{8}$ inches. Pages, 89. Lines, 19 on a page. Character, Telugu. Condition, fair. Appearance, old.

Begins on fol. 68*a*. The other works herein are Agniṣṭōmaprayōga 1*a*, Āpastambaśrautasūtravyākhyā 111*a*.

Contains the commentary on the two Praśnas, 16th and 17th: and gives also the Telugu meanings of certain technical words in the Śrautasūtra. The commentary breaks off in the 23rd Khaṇḍa of the 17th Praśna.

Beginning :

अग्निं चेष्यमाणोऽमावास्यायां पौर्णमास्यामेकाष्टकायां वोखाꣲसंभरति । त्र्यहादिदीक्षापक्ष उखासंभरण[ादि]प्रभृत्यामिक्षापर्यन्तकर्माणि वसन्ते,यदा(था) भविष्यति, पर्वण्युखासंभरणपक्ष एकाष्टकायां चेत्तस्यामुखासंभरणं कृत्वा पश्चिष्ट्यादि सर्वं वसन्ते, चतुरो मासा इत्यस्मिन् पक्षे एकाष्टकायां न लभ्यते सर्वꣲसंभरणं मासादिकल्पेषु वसन्ते । सर्वमेव संभरणं पशुश्चैवं स्मृत्यारम्भः ।

End :

अग्ने देवाꣳ इहावः =ईड्यः । आग्नेय्या गायत्री प्रथमां चितिमुपधाया[म]भिमृशति । तत आपराह्णिकीभ्यां प्रवर्ग्योपसद्भयां प्रचरन्ति ।

सुब्रह्मण्यान्ते श्वेतमश्वं परिणयन्ति । रात्रौ चतुस्तनव्रतं प्रतिगृह्य । अन्नपते । देवस्य त्वा । रात्रिमिष्टकां या ते अग्ने रुद्रीया शिवाः पीता भवथ । रात्रौ जागरणं श्वेतमश्वं परिणीय वसन्ति वसन्ति ॥

Beginning of the 17th Praśna.

श्वो भूते पौर्वाह्णिकीभ्यां प्रचर्य द्वितीयां चितिं चिनोति । श्वो भूते विसृष्टवाचि यजमाने प्रवर्ग्योपसद्भ्यां प्रचर्य । या ते अग्नेऽयाशया तनूरित्युपसदाहुतिः षडुपसदो द्व्यहमेकैकेनोपसन्मन्त्रेण जुहोतीति वचनात् । सुब्रह्मण्यान्ते दक्षिणतः श्वेतोऽश्वस्तिष्ठति तमालभ्य वाञ्म आसन् मा मा हिंसीः । आरोहं जपति ।

End:

उप त्वाग्ने दिवे दिवे । सचस्वा नः स्वस्तये तिसृभिरन्येषां यजमानानां चित्यग्निं दृष्ट्वा उपतिष्ठते । इदमू नु श्रेयः । अध्यवसाय मथित्वोपावरोह्यायतने निधायाहवनीयं प्रणीय पूर्णाहुतिः । इदं विष्णुः । अथ सायमग्निहोत्रं काले प्रातर्होमस्सन्तिष्ठतेऽग्निः । अग्निं चित्वानन्तरे पर्वणि सौत्रामण्या यजेत । अपरेद्युर्मैत्रावरुण्या चामिक्षायाः ।

मन्त्रोपधानमध्ये तु प्रस्थारे(स्तारो) वक्ष्यतेऽधुना ।
आक्रमण्याद्यमध्यं(र)यादष्टम्याद्या तु मण्डला ॥
पञ्चमी तु द्वितीया स्यात्तृतीयस्यां चतुर्थिका ।
अन्वारोहे तु दूर्वादिहिरण्योप्त्वा तु वामभृत् ॥

* * * *

द्वे चैव षडभिज्ञेयाः क्षत्रं पाहि गणस्ततः ।
दक्षिणे दशपक्षाख्या विश्वेषु व्यादितो गणाः ॥
अष्टौ पक्षेष्टकास्तिस्रः पक्षमध्याश्च दक्षिणाः ।
एकादशेष्टकास्स्वर्जिदन्तरे पक्ष उच्यते ॥

द्वे पक्षाप्ययुगे पञ्चपक्षसंज्ञास्सपत्नहः ।
तत्रैवैकादशाब्धि वै ते समुग्याः पराः क्रमात् ॥

Colophon:

चयनप्रश्नस्समाप्तः ॥

No. 1067. आपस्तम्बश्रौतसूत्रव्याख्या.

ĀPASTAMBAŚRAUTASŪTRAVYĀKHYĀ.

Substance, paper. Size, $12\frac{1}{2} \times 7\frac{7}{8}$ inches. Pages, 37. Lines, 27 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 46*a*.

The other works herein are: Agniṣṭōmaprayōgaḥ 1*a*, Brahmamēdhaprayōgaḥ 70*a*, Sūryasōmōparāgavidhānam 94*a*, Ādhānaprayōgaḥ 95*b*, Darśapūrṇamāsaprayōgaḥ 10*a*, Paśubandhaprayōgaḥ 143*a*

Contains the commentary on the 17th Praśna. It breaks off in the course of the 23rd Khaṇḍa. This is more orless a copy of the corresponding portion of the MS. described under the last No.

Beginning:

श्वो भूते पौर्वाह्णिकीभ्यां प्रचर्य द्वितीयां चितिं चिनोति । श्वो भूते विसृष्टवाचि यजमाने प्रवर्ग्योपसद्भ्यां प्रचर्य या ते अग्नेऽयाशया तनूरित्युपसदाहुतिः षडुपसदो द्व्यहमेकैकेनोपसन्मन्त्रेण जुहोतीति वचनात् । सुब्रह्मण्यान्ते दक्षिणतः श्वेतोऽश्वस्तिष्ठति, तमालभ्य वाज्य आसन् मा मा हिंसीः ।

End:

आध्यायमग्रतः पञ्च ततो दक्ष्यत्रृषीष्टकाः ।
आध्यायमादितः पञ्च चैकैकश्चोत्तरा मता ॥
तस्यामेव नवम्यादिसप्तपादास्त्वनन्तराः ।
द्वितीयोत्तरगास्तिस्रो द्वे तृतीयान्त्यगे अपि ॥

चतुर्थ्यन्तगतौ पादा षट् सनीः परिकीर्तिताः ।
दक्षपक्षाप्ययस्थास्तु चतस्रः पक्षसंज्ञिके ॥
द्वे चैव षडभिज्ञेयाः क्षत्रं पाहि गणस्ततः ।

No. 1068. आपस्तम्बश्रौतसूत्रव्याख्या.

ĀPASTAMBAŚRAUTASŪTRAVYĀKHYĀ.

Pages, 62. Lines, 14 on a page.

Begins on fol. 1*a* of the MS. described under No. 6.
Incomplete

Contains the commentary on the 17th Praśna, and is like the MS. described under No. 1067.

Beginning: Same as in the above work.

End:

उत्तराꣳश्रोणीम्—वनसदे वट् । दक्षिणाम्—बर्हिष्म (षदे) वट् । उत्तरमꣳसम्—सुवर्विदे वट् । मध्यम्—पञ्चभिरुत्तरवोदिवदाग्निꣳस्वयमातृणां (ण्णां)वा व्याघारयति । सर्वत्राग्नय इदं न स्वाहाकारः

ये देवा देवानां यज्ञ(ज्ञि) . . . अधि स्नुषु ॥

No. 1069. आपस्तम्बश्रौतसूत्रप्रयोगवृत्तिः.

ĀPASTAMBAŚRAUTASŪTRAPRAYŌGAVṚTTIḤ.

Pages, 14. Lines, 8 on a page.

Begins on fol. 69*a* of the MS. described under No. 1053.

Contains the commentary on the 2nd Praśna; by Tālavṛnta-nivāsin.

As this MS. is much injured, the colophon only is given here.

. . . योगवृत्त्यां तालवृन्तनिवासिकृतायां प्रदीपिकायां द्विषाहस्रत्रिषाहस्रप्रयोगस्समाप्तः ॥

No. 1070. आपस्तम्बश्रौतसूत्रव्याख्या.

ĀPASTAMBAŚRAUTASŪTRAVYĀKHYĀ.

Pages, 94. Lines, 18 on a page.

Begins on fol. 111*a* of the MS. described under No. 1066.

Contains the commentary, said to be by Āṇḍapilla, known also as Tālavṛntanivāsin, on Praśnas 10 to 12 of the Āpastamba-śrautasūtra.

Beginning :

अथ सोमप्रयोग उच्यते—सोम ओषधिविकारः तत्साधनत्वात् कर्मनामधेयं तेन यक्ष्यमाणः यस्य सोमेन यक्ष्यमाणस्य पिता पितामहो वा उभौ यजेत(?)। केचिदन्यतरविच्छेदे नैन्द्राग्न इति। केचित् पितृविच्छदे ऐन्द्राग्नः पितामहविच्छेदे नैतत्.

* * * *

इति सोमपञ्चके प्रथमप्रश्नः समाप्तः ॥

* * * *

इति सोमपञ्चके द्वितीयप्रश्नः समाप्तः ॥

End :

पञ्चदोहनानां भिन्नाकरणं लौकिकेऽग्नौ श्रपणम् अपूर्वत्वात् एतानि प्रज्ञातानि निदधाति। अत्र सवनीयस्य पशोः सवनीयानां पुरोडाशानां साधारणं न वा बर्हिः प्रस्तरमित्यत्र पक्षे तथा वैशेषि ॥

आन्ध्र(ण्ड)पिल्लासप्तमपटलः

Colophon :

तृतीयप्रश्नः समाप्तः ॥

No. 1071. आपस्तम्बप्रयोगप्रदीपिका.

ĀPASTAMBAPRAYŌGARPADĪPIKĀ.

Substance, paper. Size, $13\frac{1}{4} \times 8\frac{1}{4}$ inches. Pages, 214. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

Contains the commentary of Tālavṛntanivāsin on the first 8 Praśnas. It opens in the 3rd Paṭala of the I Praśna and breaks off in the 4th Paṭala of theVIII Praśna.

Beginning :

पिण्डपितृयज्ञस्य कर्म—यस्मिन्नहनि चन्द्रमा न दृश्यते तस्मिन्नहन्य पराह्णे प्राचीनावीती प्रथमे प्रयोगे पिण्डपितृयज्ञमारप्स्ये, तेन मासि मासि यक्ष्ये। पिण्डपितृयज्ञेन यक्ष्ये इति के चित्। पिण्डपितृयज्ञेन सर्वदा यक्ष्य इति। एतदेव प्रथमे च। विद्युदसि। दृष्टचन्द्रायां प्रतिपद्यपराह्णे दक्षिणाग्निमेव (अ)ध्वर्युः प्राचीनावीती अपां मेध्यं यज्ञियमिति सकृदाच्छिन्नं बर्हिराहरति।

* * * *

इति तृतीयः पटलः॥

अमावास्यायां रात्र्यां स्वविधानादेधोदकादीनपि स्वयमेवाहृत्य यवाग्वाग्निहोत्रं जुहोति सन्नयन्। असन्नयतो यवागूनियमं स्थालीगतस्य शेषस्य निधानं सायमग्निहोत्रे हुतेऽग्नीनां परिस्तरणं न सभ्यावसक्थ्य(थ्य)योरित्युपदेशः।

* * * *

इति . . . .अष्टमः पटलः.

एषा त्रैविद्यवृद्धेन तालवृन्तनिवासिना।
सोमपेन कृता वृत्तिः प्रयोगस्य प्रदीपिका॥
प्रथमः प्रश्नः समाप्तः॥

वेदिकरणम्—पूर्वेद्युरमावास्यायां वेदिं कृत्वा प्रशातनमपि कृत्वा देवस्य त्वेत्यादि ब्रह्मन्नुत्तरमित्यन्तः(न्तं) पूर्वं कुर्यात्। अत्र मन्त्रेण स्फ्यमादायाभिमन्त्र्य संमृश्य ब्रह्मन्नुत्तरमिति संप्रेषः। पौर्णमास्यान्तु यथाक्रममेव देवस्य त्वा आ दद इति स्फ्यमादत्ते॥

* * * *

यूपस्योपस्थितिं कृत्वा यज्ञ शं चादि के चन ॥
इष्टेर्विधे पुरोडाशे प्रणीतापूर्णकद्वयम् ।
विष्णोश्च क्रमणं कृत्वा विष्ण्वतिक्रमणाति(दि) च ॥
एषा त्रैविद्यवृद्धेन तालवृन्तनिवासिना ।
सोमपेन कृता वृत्तिः प्रयोगस्य प्रदीपिका ॥

पशुबन्धस्समाप्तः ॥

अथ पशोर्हौत्रमुच्यते भाष्यकारेण वर्णितम् । पश्विष्टेरग्नाविष्णू देवता अग्नाविष्णू इति द्वे उपदेशादितराणीति भाष्यकारवचनात् । पश्चाद्दार्शपौर्णमासिकाया वेदेरुपविश्य निरसनोपवेशने कृत्वा यजुर्वेद-विहितमार्गेण अग्नये प्रणीयमानायेत्युक्ते प्र देवं देव्या धियेति सप्रणवामुप त्रिराह ।

*　　*　　*　　*

चातुर्मास्यानां प्रयोगः ॥

चातुर्मास्यानीति समुदायनाम । यस्मिन् संवत्सरे अधिकमासो नास्ति तस्मिन् संवत्सरे नि . . . यस्मिन् संवत्सरेऽपराह्ले पर्वचतुष्टयस्य सन्धिस्तास्मिन् संवत्सरे याग इति के चित् । फाल्गुन्यां पौर्णमास्यां चैत्र्यां वा वैश्वदेवेन यजेत । तयोः पूर्वस्यां चतुर्दश्यां प्रातरग्निहोत्रं हुत्वा प्राणानायम्य सङ्कल्पः—चातुर्मास्यैर्यक्ष्ये अक्षय्यं मे सुकृतं स्यादिति.

End :

केचित् संसृष्टे मुख्य इति वचनादुभयत्र सान्नाय्यवदेव मरुतामहं जेमा-नमिन्द्रियावी वरुणस्याहं जेमानमिन्द्रियावी वा उभयत्र अथैककपालेन प्रचरति उद्धृत्य बर्हिषमित्यादिकयानुब्रूहि कं यज.

No. 1072. आपस्तम्बश्रौतप्रयोगप्रदीपिका.

ĀPASTAMBAŚRAUTAPRAYŌGAPRADĪPIKĀ.

Substance, palm-leaf. Size, 15⅝ × 1¼ inches. Pages, 294. Lines, 8 on a page. Character, Grantha. Condition, much injured. Appearance, old.

This is the original MS. from which the MS. described under the last number has been copied. As it is much injured no extract is given therefrom. The first leaf is lost and the next four leaves are very much injured.

No. 1073. आपस्तम्बसूत्रप्रयोगवृत्तिः.

ĀPASTAMBASŪTRAPRAYŌGAVṚTTIḤ.

Substance, palm-leaf. Size, 16½ × 1⅜ inches. Pages, 366. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains the commentary of Tālavṛntanivāsin, also known as Āṇḍapiḷḷa, on the Śrautasūtra from the I Praśna; but breaks off in the Sōmapraśna, *i.e.*, the 10th Praśna.

Beginning:

गङ्गाप्रवाहपरिपूतजटाकलापः
क्रीडाफणीन्द्रचकितेन्दुमणिप्रभाभिः ।
प्रज्वालितस्फुरिततक्षकहार . . .
. . . ठहरं नमामि ॥

आपस्तम्बीयसूत्रस्य धूर्तस्वामिव्याख्यानुसारेण शास्त्रान्तरसिद्धानपेक्षितानविरुद्धानप्युपसं . . . . . अग्निचयनपर्यन्तानां कर्मणां प्रयोगवृत्तिः क्रियते । सोमान्तानि नित्यान्यफलार्थिनापि कर्तव्यानि . . . . . . स्तुतमिति वसिष्ठवचनात् । सर्वाङ्गोपसंहारस्यासमर्थस्यापि कर्तव्यानि अन्धपङ्ग्वादीनां निवृत्तिरेव । के चि . . .

यस्य कृतदारस्य कर्तव्यानि अनधीतस्यापि साधोर्दर्शपूर्णमासशब्दौ कालविशेषयोर्वचनौ तयोः कालविशे . . . . यत्ते लक्षणया कर्मणि वृत्तिकाले मुख्यः कर्मणि लक्षणेति सूत्रकाराणाम्मतम् ।

* * * *

एषा त्रैविद्यवृद्धेन तालवृन्तनिवासिना ।
सोमपेन कृता वृत्तिः प्रयोगस्य प्रदीपिका ॥

Colophon:

इत्यापस्तम्बसूत्रप्रयोगवृत्त्यां तालवृन्तनिवासिकृतायां पशुबन्धप्रयोगः समाप्तः ॥

* * * *

इत्यापस्तम्बसूत्रस्य प्रयोगवृत्त्यां तालवृन्तनिवासिकृतायां चातुर्मास्यानि समाप्तानि ॥

अथ प्रायश्चित्तान्युच्यन्ते

* * * *

अथ सोमप्रयोग उच्यते

End:

यदि सोमपूर्वाधानं तत्राधानस्य न नक्षत्रादिनियमः । सोमेन यष्टुकामो महारात्रे मध्वेत्यादि सा यावद्धातेष्टिरिति अस्यार्वाक् सर्वकालो यथा तथा ॥

No. 1074. आपस्तम्बप्रवरसूत्रभाष्यम्.

ĀPASTAMBAPRAVARASŪTRABHĀṢYAM.

Substance, paper. Size, 6⅜ × 4 inches. Pages, 40. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, new. Purchased in 1894.

Begins on fol. 1*a*. The codex contains also Kapardikārikā fol. 22*a*.

Refer to pages 4, 5, 147 and 148 of M. Seshagiri Śastri's Report for the year 1893–94, No. 2, for comments and extracts.

No. **1075.** आपस्तम्बपरिभाषासूत्रव्याख्या.

ĀPASTAMBAPARIBHĀṢĀSŪTRAVYĀKHYĀ.

Pages, 50. Lines, 7 on a page.

Begins on fol. 170*a* of the MS. described under No. 23.

Complete.

The Paribhāṣāprakaraṇa is a portion of the 24th Praśna of the Āpastambakalpasūtra, the other parts dealing with Pravara and Hautraka. The commentary is by Haradattācārya.

Beginning:

यज्ञं व्याख्यास्याम इति । अत्रायमारम्भहोमः । नित्ययज्ञक्रिया-(वा)न् पुरुषः श्रियाभिव्यनक्ति। तस्यैवाक्रिया प्रत्यवायं संपादयति । ऋण-कृते अक्रियायाश्च प्रायश्चित्तविधानात् । ये चान्ये आश्रमा ऊर्द्ध्वरेतसां ते च नित्यश्रुतिविरोधा[ना]दनधिकृतार्थपरत्वादिविषयतया व्याख्येयाः । एवम-नुष्ठेयो यज्ञं(ज्ञः) श्रुत्यर्थस्यासर्वज्ञागम्यत्वेन शाखान्तरविध्युपसंहाराशक्तेश्च व्याख्यानतोऽनुष्ठातुं न शक्यत इति करुणाविष्टहृदयतया धर्मकथनाय गत-श्रेयोऽर्थितया च यज्ञं व्याचिकीर्षन्नाचार्यः प्रतिजानीते यज्ञं व्याख्या-स्याम इति । यज्ञं वि आख्यास्यामः देवतां प्रति स्वद्रव्यस्योत्सर्जनं यज्ञः, यज्ञ इत्येकविंशतिसंस्थो यज्ञजात्यभिमानेन व्यपदिश्यते । सप्त सोमसंस्थाः, सप्त हविर्यज्ञसंस्थाः, सप्त पाकयज्ञसंस्था इति । अग्निष्टोमोऽ-त्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्याम इति सप्त सोम-संस्थाः । अग्निहोत्रं दर्शपूर्णमासावाग्रयणं पिण्डपितृयज्ञश्चातुर्मास्यानि निरूढपशुबन्धः सौत्रामणीति सप्त हविर्यज्ञसंस्थाः । औपासनहोमो वैश्वदेवं पार्वणमष्टका मासिश्राद्धं सर्पबलिरीशानबलिरिति सप्त पाकयज्ञ-

संस्थाः। वि-आ-इत्येतावुपसर्गौ क्रियाशब्दमर्थान्तरे वर्तमानमभिद्योतयति (त): यथा प्रतिष्ठि(ष्ठ)त इति तामेव क्रियां विशेषयतः(ति) ।

End:

यज्ञार्थस्य त्र्यम्बकहोमार्थस्येति एवमादि तत्र तत्र द्रष्टव्यम् । यत्र प्रणीतस्याग्नेः कर्मचोदनात् तत्र प्रवृत्तेऽपि कर्मणि न लौकिको भवति यथा पर्यग्निकरणार्थस्याग्नेः प्रत्यपिसृज्योल्मुकमिति तस्य प्रतिनयनं कर्तव्यम् ॥

Colophon:

इत्यापस्तम्बपरिभाषाव्याख्या समाप्ता ॥
हरदत्तविरचितेयं व्याख्या ॥

No. 1076. आपस्तम्बपरिभाषासूत्रव्याख्या.

ĀPASTAMBAPARIBHĀṢĀSŪTRAVYĀKHYĀ.

Substance, palm-leaf. Size, $16\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 64. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, new.

Begins on fol. 1*a*. The other work herein is Cayanānukramaṇikā 33*a*.

Complete. Same as the last.

The colophon in the MS. runs as follows:

इति हरदत्तकृतापस्तम्बपरिभाषाव्याख्या समाप्ता ॥

No. 1077. प्रायश्चित्तशतद्वयी सव्याख्या.

PRĀYAŚCITTAŚATADVAYĪ WITH COMMENTARY.

Pages, 108. Lines, 17 on a page.

Begins on fol. 25*a* of the MS. described under No. 1065.

Contains 3 Prakaraṇas in full, and only 40 verses in the 4th Prakaraṇa.

This is a work with commentary in 2 centums of verses treating of the expiatory rites connected with Śrauta sacrifices as given in Āpastamba-Śrautasūtra. The commentary is by Vēṅkatēśa of Vatsa-Gōtra.

Beginning :

आपस्तम्बमुनिं नत्वा प्रायश्चित्तशतद्वयीम् ।
मन्दानां सुखबोधाय व्याकरिष्ये यथामति ॥

तत्र तावत् प्रारिप्सितस्य ग्रन्थस्य विषयप्रयोजनादिकं दर्शयति—

नैमित्तिकेषु श्रुतिलक्षणेषु सूत्रे यदस्पष्टमिवाल्पबुद्धेः ।
तद्भाष्यवृत्त्याद्यनुसृत्य सम्यक् स्वरूपबोधाय विविच्यते तत् ॥

हविर्यज्ञप्रायश्चित्तेषु सोमप्रायश्चित्तेषु च मन्दबुद्धीनां सूत्रे यदस्पष्टमिव प्रतीयते तदेव प्रायश्चित्तं तेषां स्पष्टावबोधार्थं स्वरूपतो विषयतश्च विविच्य प्रदर्श्यते । यद्यपि सूत्रेऽस्पष्टं व्याख्याने स्पष्टं भवति तथापि भाष्ये वृत्तौ प्रयोगवृत्तौ च व्याकीर्णतया दुर्ज्ञेयस्य प्रायश्चित्तस्य भाष्याद्यनुसृत्य क्रमेणैकत्र समू(मु)ह्य प्रतिपादने मन्दबुद्धीनां सुखावबोधो भवतीति तदर्थोऽयमारम्भ इत्यर्थः । (1) इदानीं श्रुतिलक्षणं प्रायश्चित्तमित्यादिपरिभाषासूत्रार्थं दर्शयति—

श्रुत्युक्तकर्मण्यकृतेऽन्यथा वा कृतस्य चित्तं श्रुतिलक्षणं स्यात् ।
पुंसोऽपराधे स्मृतिलक्षणश्च निमित्तसंख्यादि विवक्ष्यते नः ॥

श्रुत्या यत् कर्मावश्यकतया यथा विधीयते तस्मिन्ननुष्ठिते अन्यथा वानुष्ठिते सति . . . . श्रुतिविहितमेव प्रायश्चित्तं कर्तव्यं न पुनस्स्मृतिलक्षणमपि श्रुतिप्रत्यये हि कर्मणि भ्रेषे सति तत्समाधानेनापि श्रुतिप्रत्ययेनैव भवितव्यम् ।

* * * *

इति श्रीवत्सकुलभूषणश्रीवेङ्कटेशवाजपेययाजिनः कृतौ प्रायश्चित्तशतद्वयीव्याख्याने प्रायश्चित्तनिरूपणं नाम प्रथमं प्रकरणम् ।

इति प्रायश्चित्तशतद्वयीव्याख्याने हविर्दोषप्रायश्चित्तनिरूपणं नाम द्वितीयं प्रकरणम् ।

इति प्रायश्चित्तशतद्वयीव्याख्याने तृतीयं प्रकरणम् ।

End:

विधीयते ब्रह्मण एव तत्तत् श्रेषोदितव्याहि(हृ)तिचिन्तनं यत् ।
पूर्वोक्तहोमेन विकल्प्यते तत् सोमेन पश्चिष्टिषु तत् प्रवृत्तिः ॥ ४० ॥

ऋग्वेदाद्युक्तकर्मश्रेषे ब्रह्मणो भूरादिव्याहृतिध्यानमुक्तम् . . . . . चातुर्मास्येषु हविर्यज्ञप्रायश्चित्तप्रकरणे अनुक्तत्वादिति भावः ॥

No. 1078. प्रायश्चित्तशतद्वयी सव्याख्या.

PRĀYAŚCITTAŚATADVAYĪ WITH COMMENTARY.

Substance, paper. Size, 13⅜ × 8¼ inches. Pages, 112. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Khādiragṛhyasūtra with commentary 57*a*. Prakaraṇa 1 contains 46, II contains 60, III contains 59 and IV contains 42 stanzas altogether.

Contains 4 Prakaraṇas.

Same as the last.

Colophon:

इति वत्सकुलभूषणस्य ग्रामैकदेश(वेङ्कटेश)वाजपेययाजिनः कृतौ प्रायश्चित्तशतद्वयीव्याख्याने अग्न्यनुगमादिप्रायश्चित्तनिरूपणं नाम प्रथमप्रकरणम् ॥

* * * *

इति वत्सकुलभूषणस्य श्रीवेङ्कटवाजपेययाजिनः कृतौ प्रायश्चित्तशतद्वयीव्याख्याने हविर्दोषप्रायश्चित्तनिरूपणं नाम द्वितीयं प्रकरणम् ॥

* * * *

इति वत्सकुलभूषणस्य श्रीवेङ्कटेशवाजपेययाजिनः कृतौ प्रायश्चित्त-शतद्वयीव्याख्याने तृतीयप्रकरणम् ॥

End:

अनुक्तमवाप्यपरिस्फुटं यत्तद्भाष्यवृत्त्यादिषु बोधनीयम् ।
तत्राप्यनुक्तं तु तदुक्तरीत्या यथानिमित्तं स्वयमूहनीयम् ॥

न तावदस्मिन् सङ्ग्रहे सर्वाणि प्रायश्चित्तानि साकल्ये(न) प्रतिपादयितुं शक्यन्ते विस्तरप्रसङ्गात् । अतोऽनुक्तमस्पष्टं वा भाष्यवृत्तौ प्रयोगवृत्तौ वा द्रष्टव्यम् । तत्रापि सर्वं नैमित्तिकं वक्तुं शक्यं प्रमादादिदोषवशान्नानाविधस्खलनसम्भवात् । अतस्तत्राप्यनुक्तं सूत्रभाष्याद्युक्तन्यायानुसारेण तत्तन्निमित्तानुसरणं स्वयमेवोहनीयमिति सिद्धम् ॥

इति वत्सकुलभूषणश्रीवेङ्कटेशवाजपेययाजिनः कृतौ प्रायश्चित्तशतद्वयीव्याख्याने चतुर्थप्रकरणम् ॥

Colophon:

शतद्वयीव्याख्यानं समाप्तम्.

No. 1079. आपस्तम्बश्रौतप्रायश्चित्तशतद्वयीव्याख्यानम्.

ĀPASTAMBAŚRAUTAPRĀYAŚCITTAŚATADVAYĪVYĀKHYĀNAM.

Pages, 126. Lines, 7 on a page.

Begins on fol. 49*a* of the MS. described under No. 1050.

Contains the commentary on 203 stanzas. One more stanza is wanting.

Same as the last, except that the last stanza is incomplete.

No. 1080. प्रायश्चित्तशतद्वयी.

PRĀYAŚCITTAŚATADVAYĪ.

Pages, 45. Lines, 17 on a page.

Begins on fol. 127*b* of the MS. described under No. 237.

Contains 5 Paṭalas.

This work is said to have been written by Bhāskara. He has added a commentary to it which is described under the next number. This work is different from another work of the same name described under No. 1077, though similar to it in subject matter.

Beginning:

यस्य श्रुतौ लक्षणमात्रमेव
चित्तस्य दिष्टं श्रुतिलक्षणन्तत् ।
अथो निमित्तेन विवक्षितं स्यात्
विशेषणं क्षामहविर्गतैक्यम् ॥

नीत(ते)न्तराग्नि अ(ग्राव)पि नैव चित्तं
तथैव यष्टुस्स(स्व)गृहप्रयाणे ।
ब्रह्मौदनाग्नेः पचनात्पुरस्तात्
औपासनस्यैव विधिर्विनाशे ॥

End:

यस्मिन्नस्मिन् होमजातस्तथाग्ने-
र्गच्छेद्धूमो दक्षिणावृत्य कृष्णः ।
वातो धूमं चालयेद्वा स सव्यं
प्रायश्चित्तं व्याहृतीभिस्समस्य ॥

स्मार्ते श्रेषे सर्ववेदार्तिजे वा
सैवाम्नाता ब्राह्मणे ब्रह्मणश्च ।
वृत्तिं जन्मगुणोर्निरीक्ष्य रुचिरामार्यात्मजो भास्करः
धूर्तस्वामिमतश्च लोकमहितं कल्पान्तराणामपि ।
श्लोकानां द्विशतं व्यधत्त महिमा(तः) श्लोकैरनेकैश्शुभं
प्रायश्चित्तसमुच्चयं बुधजनैस्सम्पूज्यमानैस्सदा ॥

Colophon:

इति पञ्चमः पटलः ॥

No. 1081. प्रायश्चित्तशतद्वयीव्याख्या—प्रयोगप्रदीपिका.

PRĀYAŚCITTAŚATADVAYĪVYĀKHYĀ : PRAYŌGA-PRADĪPIKĀ.

Pages, 134. Lines, 18 on a page.

Begins on fol. 151*a* of the MS. described under No. 237.

Contains the commentary by Bhāskara on 4 Paṭalas.

Fol. 150 contains certain extracts from Smṛtis about the marriage of the younger brother before the elder is married.

Beginning:

यस्य शृति(श्रुतौ) लक्षणमात्रमेव
चित्तस्य दिष्टं श्रुतिलक्षणं तत् ।
अथो निमित्तेन विवक्षितं स्यात्
विशेषणं क्षाम[म]हविर्गतैकयम् ॥
पूर्वेण . . . . प्रायश्चित्तं प्रपाठकः ।
शतद्वयीनां(स्थ)श्लोकानां धूर्तस्वाम्यनुसारतः ॥
तान् कृत्वा मनसि श्लोकान् तदर्थमनुसंवदन् ।
करोमि सुखबोधाय प्रायश्चित्तप्रदीपिकाम् ॥

यस्य श्रुतौ लक्षणमात्रमित्यस्य श्लोकस्य तत्र प्रथमं भाष्यकारेण श्रुतिलक्षणं प्रायश्चित्तं विध्यपराधे विधीयत इत्येतावान् ग्रन्थसूत्रद्वयात्मना व्याख्यातः । अनन्तरमेकसूत्रं, तथा च प्रयोजनवशादेकसूत्रतया च प्रयोजनवशात्सूत्रद्वयात्मना कृतव्याख्यानस्यायमर्थः । श्रुतिलक्षणं प्रायश्चित्तमित्येकसूत्रम् ; तस्यार्थः । यस्य पुरोडाशः क्षामवति यदेकदेवत्य आलब्धो भूयान् भवति.

End:

तस्यां हिरण्यं निधाय इदं विष्णुरिति पृषदाज्यग्रहणादिसाधनान्तं पूर्ववत् । अत्राप्यङ्गान्तरस्पर्शे व्यापन्नम् अप्सु प्रक्षिप्त्वा स्रुचं त्यक्त्वा अन्यस्यां स्रुचि महीनां पय इति आज्यावदानं कर्म समापयेत् ॥

Colophon :

इति श्रीस्मृतिविषये आहिताग्निहोत्रप्रायश्चित्तानि ॥
इति चतुर्थः पटलः ॥

No. 1082. आपस्तम्बश्रौतप्रायश्चित्तम्.

ĀPASTAMBAŚRAUTAPRĀYAŚCITTAM.

Pages, 94. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 1050.

This work seems to be by Kēśava, and it treats of the expiatory rites connected with the Śrauta sacrifices.

Beginning :

अग्निहोत्रेष्टिपशुसोमेषु प्रायश्चित्तान्युच्यन्ते—तत्र प्रथममग्न्यनुगतप्र- . . . . . पूर्वमाहवनीयानुगमने लौकिकारणिमाहृत्य आहवनीयं भस्मना संस्पृश्य.

End :

यदि घर्मधुग्दोहकाले नागच्छेत् गङ्ग एहीत्याहूतायां यदि घर्मधुङ्नागच्छेत् अन्यां तल्लक्षणामाहूय दुग्ध्वा प्रव्रजयात् । तामृत्विग्भ्योऽन्यस्मै सुत्यायान्दद्यात् । अनुवाकौ व्याहृतयश्च एवमजाया उपदेशो गव्येव प्रायश्चित्तमिति । यदि घर्मदुघि पयो न स्यादित्यादिप्रायश्चित्तानि सूत्र एव द्रष्टव्यानि ॥

Colophon :

प्रायश्चित्तानि समाप्तानि ॥ केशवीयं समाप्तम् ॥

No. 1083. आपस्तम्बश्रौतप्रायश्चित्तम्.

ĀPASTAMBAŚRAUTAPRĀYAŚCITTAM.

Substance, palm-leaf Size, $14\frac{3}{8} \times 1\frac{3}{8}$ inches. Pages, 63. Lines, 8 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are: Vaśyaprayōgaḥ 32*b*, Nityāṣōḍaśikātantram 37*a*.

Incomplete.

A work similar in subject-matter to the last.

Beginning:

उक्ता हविर्यज्ञाः—उक्ता(:) पूर्वं सौत्रामण्याः पशुबन्धरूपत्वादुक्तप्राये(या इ)ति; हविर्यज्ञा इत्यविशेषोक्तेः। तेषु प्रायश्चित्तमवश्यंभावे दैवादज्ञानाद्वा प्रमादाद्वा पुरुषस्य भवतीति दैवादज्ञानात् ज्ञानेऽपि प्रमादाद्वा पुरुषस्याशक्त्या वा पुरुषस्यानुतिष्ठतो श्रेषः प्रायेण भवति। न च शास्त्रप्रत्यये कर्मण्यशास्त्रं कर्मशते कर्मेति।

End:

अन्ये त्वाहुः—विच्छिद्यते वा एतस्य यज्ञः। यस्य यज्ञे प्रतते आरब्धे अपरिसमाप्ते अन्तरेतामिष्टिं पाथिकृतिं(तीं)मुख्यां कुर्वन्ति। अत आग्नेय एव पथिकृद्देवत्यः कार्य एषि॥

No. **1084.** आपस्तम्बश्रौतप्रयोगः.

ĀPASTAMBAŚRAUTAPRAYŌGAḤ.

Substance, palm-leaf. Size, $15\frac{3}{8} \times 1\frac{3}{8}$ inches. Pages, 158. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are: Āśvalāyanabrahmatva 80*b*, Āpriyā 82*a*, Kuṇḍalēṣṭi 86*a*, Avabhṛtatantra 88*a*, Vaiśvadēvavidhi 95*a*, Sāvitra 99*a*, Agnihōtra 104*a*.

The work under notice contains the Prayōga or ritualistic procedure relating to the following sacrifices:

Darśapūrṇamāsa 1*a*, Ādhāna 39*b*, Agnihōtra 51*b*, Anvārambhaṇīyā 52*a*, Iṣṭi 55*a*, Vaiśvānarēṣṭi 57*a*, Āgrahāyaṇa 58*a*, Paśubandha 60*a*, Payasāgnividhi 78*a*, Gārhapatyānugataprāyaścitta 80*a*.

Beginning :

अथातो दर्शपूर्णमासौ व्याख्यास्यामः—प्रातरग्निहोत्रं हुत्वा दर्भेष्वासीनो दर्भान्धारयमाणः प्राणानायम्य सङ्कल्प्य दर्शेन यक्ष्ये, पूर्णमासेन यक्ष्ये । विद्युदसि विद्य मे पाप्मानमृतात्सत्यमुपैमि । अस्मिन्दर्शे अस्मिन्पूर्णमासेऽध्वर्युन्त्वां वृणीमहे ।

End :

सर्वप्रायाश्चित्तङ्करोति अनन्तरं विश्वदानादि ॥

No. **1085.** आपस्तम्बश्रौतप्रयोगः.

ĀPASTMBAŚRAUTAPRAYŌGAḤ.

Substance, palm-leaf. Size, $16\frac{1}{8} \times 1\frac{3}{8}$ inches. Pages, 118. Lines, 7 on a page. Character, Telugu and Grantha. Condition, slightly injured. Appearance, old.

Contains the Prayōg aor ritualistic procedure relating to the following sacrifices :

Darśapūrṇamāsa 1*a*, Agnihōtra 25*a*, Paśubandha 30*a*, Anvārambhaṇīyā 47*a*, Pathikṛdvaiśvānarēṣṭi 49*a*, Hautra 49*b*, Vibhrastēṣṭi 50*a*, Āgrayaṇa 51*a*, Hautra 54*a*, Agnyādhāna 55*a*.

No. **1086.** आपस्तम्बश्रौतप्रयोगः.

ĀPASTAMBAŚRAUTAPRAYŌGAḤ.

Pages, 112. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 1050.

Contains the Prayōga relating to Paśubandha 1*a*, Ādhāna 28*a*, Darśapūrṇamāsa 41*a*, Paśumaitrāvaruṇa 61*a*.

No. 1087. आपस्तम्बश्रौतेष्टिप्रयोगः.

ĀPASTAMBAŚRAUTĒṢṬIPRAYŌGAḤ.

Pages, 76. Lines, 8 on a page.

Begins on fol. 108*a* of the MS. described under No. 1051.

Contains the Prayōga relating to the following sacrifices:

Mṛgārēṣṭi, Mitravindēṣṭi, Vaiśvānarēṣṭi, Daśahaviṣkāpavitrēṣṭi, Āyuṣkāmēṣṭi, Vrātapatīṣṭi, Hautravaiśvānarēṣṭi, Pavitrēṣṭihautra.

Beginning:

अमावास्यायां पौर्णमास्यां वा प्रातरग्निहोत्रं हुत्वा सङ्कल्पं करोति— अंहआगएनोनिवृत्त्यर्थं दशहविषा मृगारेष्ट्या यक्ष्ये । विद्युदादि अमावास्यं त्रम् (स्यातन्त्वम्) अद्य यज्ञाय। इमामूर्जम् । पिष्टं हविः । सप्तदश सामिधेन्यः ।

End:

वपायां श्रप्यमाणायां देव्याश्शमितार आरभध्वम् । एकादश प्रयाजाः ।

* * * *

No. 1088. दर्शपूर्णमासप्रयोगः.

DARŚAPŪRṆAMĀSAPRAYŌGAḤ.

Pages, 70. Lines, 29 on a page.

Begins on fol. 108*a* of the MS. described under No. 1067.

Complete.

The Prayōga herein closely follows the Śrautasūtra of Āpastamba, Praśnas 1—4. It gives the ritualistic procedure relating to the Darśapūrṇamāsa sacrifice.

Beginning:

अथातो दर्शपूर्णमासौ व्याख्यास्यामः । प्रातरग्निहोत्रं हुत्वा दर्भेष्वासीनो दर्भान् धारयमाणः पत्न्या सह प्राणानायम्य सङ्कल्पं करोति—उपात्तदुरितक्षयद्वारा परमेश्वरप्रीत्यर्थं दर्शेन यक्ष्ये ।

End:

दधिक्राविण्ण इति दधि, यज्ञ शश्च म आयुश्च मे बलश्च मे, यज्ञशिवो मे सन्तिष्ठस्व, यज्ञस्विष्टो मे संतिष्ठस्व, यज्ञारिष्टो मे सन्तिष्ठस्व, वृष्टिरासि वृश्च मे पाप्मानमृतात्सत्यमुपागाम् । ब्राह्मणांस्तर्पयतवै अग्ने नयेत्यादि प्रवसन् काले विहारमभिमुखो याजमानं जपति । दर्शपूर्णमासाभ्यां सोमेन पशुना वेष्ट्वा जपति जपति ॥

No. **1089.** दर्शपूर्णमासप्रयोगः.

DARŚAPŪRṆAMĀSAPRAYŌGAḤ.

Substance, palm-leaf. Size, 17 × 1½ inches. Pages, 71. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are: Paśubandha 37*a*, Ādhāna 51*b*, Paśuhautra 59*a*, Paśumaitrāvaruṇa 62*a*.

Complete.

Same as the last.

No. **1090.** दर्शपूर्णमासप्रयोगः.

DARŚAPŪRṆAMĀSAPRAYŌGAḤ.

Substance, palm-leaf. Size, 15×1½ inches. Pages, 37. Lines, 7 on a page. Character, Telugu. Conditon, slightly injured. Appearance, new.

Incomplete.

Begins on fol. 22*a*. The other work herein is Paśubandhaprayōga 1*a*.

Contains fully the Prayōga agreeing with the first Praśna, and breaks off in the course of the second Praśna.

Same as No. 1088.

No. 1091. दर्शपूर्णमासप्रयोगः.

DARŚAPŪRṆAMĀSAPRAYŌGAḤ.

Substance, palm-leaf. Size, 14 × 1⅛ inches. Pages, 117. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete.

Begins on fol. 23*a*. This leaf is numbered as 31. The first 22 leaves also contain a portion of this same work.

Same as No. 1088.

No. 1092. दर्शपूर्णमासप्रयोगः.

DARŚAPŪRṆAMĀSAPRAYŌGAḤ.

Pages, 64. Lines, 7on a page.

Begins on fol. 138*a* of the MS. described under No. 23.

Complete.

Same as No. 1088.

End :

दर्शपूर्णमासाभ्यां सोमेन पशुना वेष्ट्वा जपति । वृष्टिरसि वृश्च मे पाप्मानमृतात्सत्यमुपागाम् । ब्राह्मणांस्तर्पयतवै सम्प्रेष्यति। सन्तिष्ठेते दर्श-पूर्णमासौ ॥

गरिमिल्लकुलाकूपारसमुद्भूतेन वेङ्कटाध्वरिसूनुना अय्याशास्त्रिणा रौद्रि-नामसंवत्सरकार्तिकमासे लिखितमिदं पुस्तकम् ॥

No. 1093. आपस्तम्बश्रौतप्रयोगः.

ĀPASTAMBAŚRAUTAPRAYŌGAḤ.

Substance, palm-leaf. Size, 14¼ × 1⅓ inches. Pages, 272. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Contains the Prayōga relating to the Agniṣṭōma (1*a*) and Paśubandha (116*a*) sacrifices.

No. 1094. आपस्तम्बश्रौतप्रयोगः.

ĀPASTAMBAŚRAUTAPRAYŌGAḤ.

Substance, palm-leaf. Size, $16\frac{5}{8}\times1\frac{3}{8}$ inches. Pages, 64. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

The first leaf is numberd as 43 and the last as 92. The last two leaves are half torn.

The work, as found here, has neither beginning nor end ; and seems to treat of the Agniṣṭōma sacrifice.

No. 1095. अग्निहोत्ररक्षामणिः.

AGNIHŌTRARAKṢĀMAṆIḤ.

Pages, 22. Lines, 20 on a page.

Transcribed in 1895.

Begins on fol. 1*a* of the MS. described under No. 1031.

Contains 5 Mayūkhas.

This is a work in verse treating of the Agnihōtra sacrifice and closely following the VI Praśna of Āpastambaśrautasūtra. It is said to have been composed by Kāmakōṭidīkṣita, son of Nārāyaṇa-Sōmayājin of the Bhāradvājagōtra.

Beginning :

यं सन्तः फम(लदं)मत्वा यत्नात् कर्माणि कुर्वते ।
चित(द)म्बरेशमालम्बे तं सदाम्बिकया सह ॥
सुखबोधाय बाला(ना)मग्निहोत्रस्य कर्मणः ।
आपस्तम्बोदीरितस्य विवेकः क्रियते मया ॥

सायं वृक्षाग्रदृष्टेंऽशौ भानोः प्राक् कृत्स्ननाशतः ।
प्रातसू(स्तू) षसि तस्य प्राक् कृत्स्नमण्डलदर्शनात् ॥
यष्टा तस्य त्वसान्निध्येऽध्वर्युर्वाचम्य शास्त्रतः ।
प्रविश्याग्निगृहं गार्हपत्यमुत्तरदेशतः ॥
प्राप्य प्राणान् समायम्य त्रिः शास्त्रप्रोक्तमार्गतः ।
ईश्वरप्रीतये होष्याम्यग्निहोत्रमिति स्फुटम् ॥

End:

विकीर्येदं विष्णुरिति मन्त्रेणाहवनीयतः ।
पूरयेत्तेन मन्त्रेण पदान्यप्यस्य भस्मना ॥
इध्माधा(ना)त्पुरा यष्टुः होमात्प्रागशनं यदि ।
यत्ते वयं यथाहेति जुहुयादाहुतिद्वयम् ॥
इत्थं प्रदर्शितान्यत्र प्रायश्चित्तानि कानि चित् ।
ज्ञेयानि स्वयमन्यानि सूत्रभाष्यादिवेदिभिः ॥

Colophon:

इति पदवाक्यप्रमाणपारावारपारीणभारद्वाजकुलतिलकश्रीनार्ण (नारायण)-सोमयाजिसुतनयस्य कामकोटिदीक्षितस्य कृतावग्निहोत्ररक्षामणौ पञ्चमो मयूखः ॥

No. 1096. अग्निहोत्ररक्षामणिव्याख्या.

AGNIHŌTRAṚAKṢĀMAṆIVYĀKHYĀ.

Pages, 83. Lines, 20 on a page.

Transcribed for the Library in 1895. Begins on fol. 12*a* of the MS. described under No. 1031.

This is a commentary on the last described work, composed by Rāmacandradīkṣita, son of Anantasōmayājin of the Bhāradvāja-gōtra.

This MS. contains the commentary on 3 Mayūkhas.

The copyist's note at the end is शे रामस्वाम्याख्यार्येण लिखितम् ॥

Beginning:

पुनरीप्सितपरिसमाप्तिपरिपन्थिविघ्नाविघाताय स्वेष्टदेवतां नमस्करोति--

यं सन्तः फलदं मत्वा यत्नात्कर्माणि कुर्वते ।
चिदम्बरेशमालम्बे तं सदाम्बिकया सह ॥

सन्तो महात्मानः यं फलदं यज्ञादिफलकर्मदायिनं मत्वा अचेतनानां कर्मणां फलप्रदा(ना)नुपपत्तेः कर्मणाराधितः परमेश्वर एव फलप्रद इति निश्चित्ये(त्य)र्थः । यत्नात्कर्माणि यज्ञादीनि कुर्वते तं चिदम्बरेशम् अम्बिकया सह सदा आलम्बे आश्रयामीत्यर्थः । अथ स्वग्रन्थे प्रेक्षापक(वत्प्र)वृत्तये विषयप्रयोजने दर्शयन् चिकीर्षितं प्रतिजानीते—

सुखबोधाय बालानामग्निहोत्रस्य कर्मणः ।
आपस्तम्बोदीरितस्य विवेकः क्रियते मया ॥

अक्षरार्थः स्पष्टः । अत्रापस्तम्बोदीरितस्येत्यनेन सूत्रान्तरोक्ताग्निहोत्रव्यावृत्तिः क्रियते । पूर्वार्धे विषयप्रयोजने दर्शिते । आहिताग्नेरारब्धाग्निहोत्रस्य अगतश्रियो दर्शाद्यर्थं प्रणीतवह्नेः आद्वादशाहव्रतयजमानस्य अग्निहोत्रकर्मणः प्रणयनोपक्रमस्त्वा(त्वा)त् तस्य च कालापेक्षितत्वात् सायंप्रातः प्रणयनकालमाह.

End:

अवसाने प्रयाणस्य विहृत्य प्राच्यपा(व)क्रम् ।
तत्रेदं श्रेय इत्युश्वा कुर्यादवसिताहुतिम् ॥

प्रयाणस्यावसाने गन्तव्यदेशप्राप्त्या पुनः स्वदेशप्राप्त्या वा प्रयाणे समाप्ते सति तत्र विहारं कल्पयित्वाहवनीयं विहृत्य तत्राहवनीये इदं श्रेयोऽवसान इति मन्त्रेणावासिताहुतिमध्वर्युः कुर्यादित्यर्थः ॥

Colophon:

इति पदवाक्यप्रमाणपारावारपारीणभारद्वाजकुलतिलकश्रीमदनन्तसोमयाजिवरतनयस्य रामचन्द्रदीक्षितस्य कृतावग्निहोत्ररक्षामणौ तृतीयो मयूखः समाप्तः ॥

No. 1097. अग्निहोत्रप्रयोगः.

AGNIHŌTRAPRAYŌGAḤ.

Pages, 14. Lines, 19 on a page.

Begins on fol. 273*b* of the MS. described under No. 237.

Complete.

The text of the Mantras quoted by Āpastamba is fully given herein along with the directions for the proper conduct of the ritual. This work closely follows Āpastambaśrautasūtra, Praśna VI, and treats of the Agnihōtra sacrifice.

Beginning:

धृष्टिरसि ब्रह्म यच्छ धृष्टिमादाय सुगार्हपत्यो विदहन्नरातिरुषसश्श्रेयसी(:) श्रेयसीर्दधातु । अग्ने सपत्नां ऽ अपबाधमानो रायस्पोषमिषमूर्जमस्मासु धेहि । गार्हपत्यमभिमन्त्रिया(न्त्र्य) ।

End:

अग्नये वैश्वानराय सुवर्गाय लोकायेदम् । तत्रैव कृष्णाजिनशम्यामग्निहोत्रहवणीं दृषदुपले चानुप्रहरति । एतदन्तं सोमयाजिनः । तमग्निं शमयति ॥

No. 1098. आधानकारिका.

ĀDHĀNAKĀRIKĀ.

Substance, palm-leaf. Size, $11\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 12. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are: **Paśubandhakārikā** 7*a* and **Sōmakārikā 11*b***.

Incomplete.

Contains the ritualistic procedure relating to the Ādhāna sacrifice in verse. This may be by Vāsudēvadīkṣita, as the other Kārikas contained in the codex are all composed by him, though no mention is made of the author in this work itself.

Beginning:

अग्न्याधानं समुद्दिष्टं त्रिविधं याज्ञिकैरिह ।
होमपूर्वन्त्विष्टिपूर्वं सोमपूर्वन्तथैव च ॥ (१)
दर्शाधानं होमपूर्वं नक्षत्राधानमेव च ।
पौर्णमास्यां यदाधानमिष्टिपूर्वन्तदुच्यते ॥ (२)
सोमात्पूर्वं यदाधानं सोमपूर्वन्तदुच्यते ।
दर्शाधानेऽपि नाक्षत्रे द्वादशाहादिकल्पनम् ॥ (३)
इष्टिपूर्वे सोमपूर्वे विच्छिन्नेऽपि न तद्भवेत् ।
वसन्ते पर्वणोः पूर्वपक्षे नक्षत्र एव वा ॥ (४)

End:

दक्षिणा मिथुनौ गावौ ब्राह्मणावि(णेने)ति चोद्यते ।
यज्ञो बभूव रहितं यज्ञशश्वविवर्जितम् ॥
उपस्थानादिकं सर्वं समानन्तर्पणावधि ।
श्वो भूते पौर्णमासेष्टौ व्याहृत्या (सा)दनं भवेत् ॥
पुनस्संवत्सरान्तेऽपि व्याहृत्या सादनं भवेत् ।

No. **1099.** आधानप्रयोगः.

ĀDHĀNAPRAYŌGAḤ.

Substance, palm-leaf (Śrītāḷa). Size, 20 × 2¼ inches. Pages, 14. Lines, 14 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is **Bhōjacampuvyākhyā** 11*a*.

Complete.

Another work on the ritualistic procedure of the Adhāna sacrifice.

Beginning :

भवसञ्चितपापौघविध्वंसनविचक्षणम् ।
विघ्नान्धकारभास्वन्तं विघ्नराजमहं भजे ॥

आधानप्रयोग उच्यते—उक्तनक्षत्रेषु ब्राह्मणादयोऽग्नीनादधीरन् । प्रातरौपासनं हुत्वा दर्भेष्वासीनो दर्भान् धारयमाणः पवित्रपाणिः पत्न्या सह प्राणानायम्य, सङ्कल्पं करोति—सर्वकर्मभ्यः पूर्वं सोमेन यक्ष्यमाणोऽग्नीनाधास्ये.

End :

अग्नाविष्णू इदम्—ताम् । सरस्वति इदं हविः । सरस्वान् इदम् । अग्निर्भगी इदं हविः । देवा आज्यपा इत्यादि सर्वं समानम् ॥

No. **1100.** आधानप्रयोगः.

ĀDHĀNAPRAYŌGAḤ.

Pages, 25. Lines, 22 on a page.

Begins on fol. 95*b* of the MS. described under No. 1067. Complete.

Similar to the last.

Beginning :

पूर्वेद्युः प्रातरौपासनं हुत्वा पत्न्या सह प्राणानायम्य, देशकालौ संकीर्त्य सर्वकर्मभ्यः पूर्वं सोमेन यक्ष्यमाणोऽग्नीनाधास्ये । सर्वक्रत्वर्थं येरस्म्यधिकृतो यांश्च शिक्ष्यामि(?) क्रयोक्तमिति सङ्कल्प्य, अयज्ञत्वात् न विद्य(द्यु)त् । अग्निमन्नाधाने अध्वर्युं त्वां वृणीमहे.

End :

ब्रह्मन् वाहनमश्वं ते ददामि । होतः धेनूस्ते ददामि । अध्वर्यो अनड्वाहं ते ददामि । ब्राह्मणाः वासो मिथुनौ गावौ नवश्च रथं

गां वो ददामि । अयज्ञत्वान्न प्रतिमन्त्राः । मन्त्रेणेति केचित् । हविश्शेषो-द्वासनादिसूक्तवाके अग्नय इदम् अग्नेरहमुज्जितिं, सोमायेदं सोमस्याह-मुज्जितिं, देवेभ्य आज्यपेभ्य इत्यादि यज्ञो बभूव यज्ञशं च म इति वर्जम् ॥

इष्टिस्समाप्यते ॥

No. **1101.** आधानप्रयोगः.

ĀDHĀNAPRAYŌGAḤ.

Substance, palm-leaf. Size, 16 × 1½ inches. Pages, 38. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 23*a*. The other works herein are Darśapūrṇamāsēṣṭihautram 1*a*, Paśubandhaprayōgaḥ 42*a*.

Complete.

This somewhat resembles the copy described on page 74 of the India Office Library Catalogue.

Similar to the last.

Beginning :

ओम् अग्न्याधेयं व्याख्यास्यामः। विदुषा ब्राह्मणेन धमस्व यजस्व इत्युक्तः सर्वजनमैत्रीं कृत्वा तीर्थस्नानजपहोमार्चनादिभिः संशोध्यात्मानं वसन्ते ब्राह्मणोऽग्निमादधीत.

End :

अग्नेस्विष्टकृतोऽहमुज्जितिमनूज्जेषम् । येमा अग्मन्नित्यादि । यज्ञो बभूव यज्ञश्चमवर्जं ब्राह्मणतर्पणान्तम् आधानपवमानाभ्यामग्निसिद्धिः आधानापवमान(ा)भ्यामग्निसिद्धिः ॥

Colophon :

आधान(नं)[पवमानाभ्यां] समाप्तम् ॥

नारायणस्यायं ग्रन्थः स्वहस्तलिखितम्(ः) ॥

No. 1102. आधानप्रयोगः.

ĀDHĀNAPRAYŌGAḤ.

Substance, palm-leaf. Size, 16 × 1⅜ inches. Pages, 41. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. On fol. 22*a* there is some work which cannot be identified.

Complete.

Same as the last.

No. 1103. आधानप्रयोगः.

ĀDHĀNAPRAYŌGAḤ.

Pages, 10. Lines, 7 on a page.

Begins on fol. 219*a* of the MS. described under No. 23.

Incomplete.

Same as the last.

No. 1104. कुण्डलेष्टिः.

KUṆḌALĒṢṬIḤ.

Pages, 4. Lines, 8 on a page.

Begins on fol. 86*a* of the MS. described under No. 1035.

Incomplete.

The ritualistic procedure relating to a sacrifice performed for wearing a special kind of priestly ear-ring is given herein.

Beginning:

ज्योगामयावी वायुष्कामी वा यः कश्चिदमावास्यायां पौर्णमास्यां वा प्रातरग्निहोत्रं हुत्वा प्राणानायम्य, सङ्कल्पः—आयुष्याभिवृद्ध्यर्थं वा इष्ट्या

यक्ष्ये । विद्युत् । अन्वाधानादि अद्य यज्ञाय इमामूर्जं पञ्चद(शीम्) ऐष्टं हविः । पौर्णमासतन्त्रः पञ्चदश सामिधेन्यः । अलङ्कृत्य पारिस्तरणं देवा देवेषु कर्मणे वामित्यादि.

End :

खादिरादुद्धृत्य हिरण्यं प्रक्षाल्य आयुष्टे विश्वतो दधदयमग्निर्व- . मि ते। इति यजमानाय प्रयच्छति । यजमान आचम्य प्रवृत्तं प्रतिगृह्य प्रदक्षिणं दक्षिणे कर्ण आबध्नाति ॥

No. 1105. नक्षत्रेष्टिप्रयोगः.

NAKṢATRĒṢṬIPRAYŌGAḤ.

Substance, palm-leaf. Size, $16\frac{3}{8} \times 1\frac{3}{8}$ inches. Pages, 50. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Ritualistic procedure relating to a certain sacrifice called Nakṣatrēṣṭi.

Beginning :

नक्षत्रेष्टिं व्याख्यास्यामः—अग्निर्वा अकामयतान्नादो देवानां स्यामिति ता ब्राह्मण[ा]व्याख्याताः । सा या वैशाख्याः पौर्णमास्याः पुरस्तादमावास्या भवति सा स(श)श्वत्संवत्सरस्यापभरणीभिः सम्पद्यते तस्यामारभेतेति.

End :

एवं सर्वासामिष्टीनां क्रमः तत्र तत्र पौर्णमासतन्त्रममावास्यातन्त्रञ्च नक्षत्रहविषामाग्नेयविकारत्वमग्नीषोमीयविकारत्वमैन्द्राग्नविकारत्वञ्च प्रदर्शितम् ॥

Colophon :

नक्षत्रेष्टिप्रयोगः समाप्तः ॥

एवमेव दिवश्येनीभिरपामाभिर्यजेत ॥

No. 1106. पशुबन्धकारिका.

PAŚUBANDHAKĀRIKĀ.

Pages, 10. Lines, 9 on a page.

Begins on fol. *7a* of the MS. described under No. 1098.

Complete.

The author is Vāsudēvadīkṣita. The work gives in verse the ritualistic procedure relating to the Paśubandha sacrifice.

Beginning:

पर्वणोः पशुबन्धस्स्यात् सद्यस्कालो द्व्यहोऽपि वा ।
द्व्यहत्वे तु चतुर्दश्यां सद्यस्काले तु पर्वणी ॥
निरूढपशुबन्धेन यक्ष्य इत्यागुरं वदेत् ।
अयन्त इत्यथारण्योरारोप्योदवसाय च ॥

End:

न विष्णोरग्निनेत्यादिसिद्धमागोमतीं जपेत् ॥
गोमान्नमस्स्वरुभ्यश्च यज्ञशं वृष्टिरित्यपि ।
ब्राह्मणांस्तर्पयतवै स्वस्थानं प्रतियात्यथ[।] ॥

Colophon:

इति श्रीसर्वतन्त्रस्वतन्त्रेण श्रीवासुदेवदीक्षितविदुषा विरचिताः पशुकारिकास्समाप्त(ा)ः ॥

No. 1107. पशुबन्धप्रयोगः.

PAŚUBANDHAPRAYŌGAḤ.

Pages, 32. Lines, 21 on a page.

Begins on fol. 143*a* of the MS. described under No. 1067.

Complete.

Ritualistic procedure relating to the Paśubandha sacrifice.

Beginning :

प्रावृषि पौर्णमास्याममावास्यायां वा प्रातरग्निहोत्रं हुत्वा दर्भेष्वासीनो दर्भान् धारयमाणः पत्न्या सह प्राणानायम्य, सङ्कल्पं करोति—पशुबन्धमारप्स्ये, तेन संवत्सरे संवत्सरे प्रावृषि यक्ष्ये इत्यारम्भसङ्कल्पः । पुनः प्राणानायम्य.

End :

ब्रह्मा अयाडग्नीरित्यादि । यजमानः विष्णवतिक्रमादिगोमज्जपान्ते नमस्वरुभ्यस्सन्नाम्नावगातपश्चादग्ध्वांत्संभूयासं श्रृङ्गाणि वेच्छृङ्गिणां सन्ददृशिरे । चषालवन्तस्स्वरवः पृथिव्यां ते देवासः स्वरवस्तास्थिवांसः.

* * * *

ब्राह्मणांस्तर्पयतवै अग्ने नयेत्यादि प्राजहितं समारोप्य देवयजनं गच्छति ॥

Colophon :

समाप्तो निरूढपशुबन्धः ॥

No. **1108.** पशुबन्धप्रयोगः.

PAŚUBANDHAPRAYŌGAḤ.

Substance, palm-leaf. Size, $16\frac{3}{4} \times 1\frac{1}{2}$ inches. Pages, 68. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Same as the last.

No. **1109.** पशुबन्धप्रयोगः.

PAŚUBANDHAPRAYŌGAḤ.

Pages, 87. Lines, 5 on a page.

Begins on fol. 41*a* of the MS. described under No. 1101.

Incomplete.

Similar to the last.

Beginning :

सर्वान् लोकान् पशुबन्धयाज्यभिजयति । प्रावृषि पौर्णमास्या(म)मावा-स्यायां वा प्रातरग्निहोत्रं हुत्वा दर्भेष्वासीनो दर्भान् धारयमाणः पत्न्या सह प्राणानायम्य, सङ्कल्पं करोति—प्रथमप्रयोगे पशुबन्धमारप्स्ये तेन सं-वत्सरे संवत्सरे प्रावृषि यक्ष्ये.

End :

धृक्ष्यादानादि पूर्ववत् । वृष्टिरसि वृश्च मे पाप्मानमृतात्सत्यमुपागाम् । . . . . . . तर्पयतवै . . . . . आचमनं ब्रह्मार्पणम् ॥

Colophon :

पशुबन्धस्समाप्तः ॥

(नाराय)णन् स्वहस्तलिखितम् ॥

No. **1110.** पशुबन्धप्रयोगः.

PAŚUBANDHAPRAYŌGAḤ.

Pages, 41. Lines, 8 on a page. First two leaves are half lost.

Begins on fol. 1*a* of the MS. described under No. 1090.

Complete.

Same as the last, excepting the end, which is different.

End :

दर्शपूर्णमासाभ्यां सोमेन पशुना वेष्ट्वा(ष्ट्वा) जपति । वृष्टिरसि . मुपागाम् । ब्राह्मणाः स्तर्पयतवै अग्ने नयेत्यादिप्रदक्षिणनमस्कारान् कृत्वा पुरुषनारा-यणं जपित्वा प्राजहितं समारोप्य गृहं गत्वा अग्निमायतन उपावरोहति ॥

The date and the name of the copyist are given in Telugu thus:— This was written by Nyāmana Śēṣu Upādhyāya, on Saturday the 12th of Kārtika-Bahula in the year Krōdhi.

No. 1111. पिण्डपितृयज्ञप्रयोगः.

PIṆḌAPITṚYAJÑAPRAYŌGAḤ.

Substance, palm-leaf. Size, $13\frac{1}{2} \times 1\frac{1}{8}$ inches. Pages, 8. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 65*a*. The other works herein are Maitrāvaruṇaprayōgaḥ 1*a*, Mahāvrālabhit 35*a*, Darśapūrṇamāsayājamānam 58*a*.

Complete.

Ritualistic procedure of the Piṇḍapitṛyajña sacrifice.

This sacrifice is treated of in Āpastamabaśrautasūtra in the first Praśna, 3rd Paṭala.

Beginning:

शुभतिथौ प्राची . पिण्डपितृयज्ञेन यक्ष्ये। विद्यु . अपां मेध्यं य . आच्छिन । अ . श्य तूष्णीं परिस्तरणार्थान् दक्षिणाग्रैर्दर्भैर्दक्षिण-मग्निं परिस्तृणाति.

End:

दक्षीणाग्नौ भुवः स्वाहेति जुहोति। प्रोक्ष्य पात्राणि द्वन्द्वमभ्युदाहरति। वृष्टिरसि । सन्तिष्ठते पिण्डपितृयज्ञः ॥

No 1112. पिण्डपितृयज्ञः.

PIṆḌAPITṚYAJÑAḤ.

Pages, 24. Lines, 8 on a page.

The sacrificial rules relating to the Piṇḍapītṛyajña sacrifice according to Āpastamba.

Begins on fol. 4*a* of the MS. described under No. 1058.

Complete.

Same as the last.

No. 1113. प्राणाग्निहोत्रेष्टिः.

PRĀṆĀGNIHŌTRĒṢṬIḤ.

Pages, 15. Lines, 7 on a page.

Begins on fol. 61*a* of the MS. described under No. 463.

Incomplete. Deals with a certain sacrifice of the above name.

Beginning:

अस्या इष्टेः पञ्चदश सामिधेन्यः । वार्त्रघ्नावाज्यभागौ, अग्निर्विष्णुरग्नीषोमाविन्द्रो वैमृधश्च प्रधानदेवताः, स्विष्टकृत्प्रयाजादयोऽङ्गदेवता देवा आज्यपाश्च[ा] इति पौर्णमास्यां, प्रधन्वन्तावाज्यभागौ, अग्निर्महेन्द्रश्च प्रधानदेवते इत्यमावास्यायाम् । प्राङ्मुखो यज्ञोपवीत्याचम्य दक्षिणावृद्विहारं प्रपद्यते.

End:

ओश्च मे स्वरश्च मे यज्ञोपचिते नमश्च यत्ते न्यूनं तस्मै ते उत यत्तेऽतिरिक्तं तस्मै ते नमः । संस्थाजप इति होतुः . . . . .
अध्वरान् स ऋतून् कल्पयाति ॥

No. 1114. सौत्रामणिप्रयोगः.

SAUTRĀMAṆIPRAYŌGAḤ.

Pages, 12. Lines, 20 on a page.

Begins on fol. 288*b* of the MS. described under No. 1237

Complete.

Ritualistic procedure relating to the Sautrāmaṇi sacrifice.

Beginning:

पयोग्रहपक्षमाश्रित्य सौत्रामण्याः प्रयोग उच्यते—अमावास्यायां पौर्णमास्यां वा पूर्यमाणपक्षस्य वा पुण्ये नक्षत्रे प्रातरग्निहोत्रं हुत्वा

पत्न्या सह प्राणानायम्य सौत्रामण्या यक्ष्ये तया परमेश्वरं प्रीणयानि.

End :

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव । यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम् । तवेमे लोकाः प्रति . . प्रतिहर्य हव्यां स्वाहा । प्रजापतय इदम् ॥

Colophon :

सौत्रामणिप्राजापत्येष्टिः समाप्ता ॥

No. 1115. सौत्रामणिप्रयोगः

SAUTRĀMAṆIPRAYŌGAḤ.

Pages, 8. Lines, 8 on a page.

Begins on fol. 103*a* of the MS. described under No. 1051.

Complete.

Similar to the last.

Beginning :

प्राणानायम्य, परमेश्वरप्रीत्यर्थं सौत्रामण्या यक्ष्ये । समारोप्य देवयजनं गत्वा मथित्वोपावरोह्य या ते निधाय । विद्युदसि षड्ढोत्रा व(प)श्विष्टिं निरूढवत् प्रयोगपक्षमाश्रित्य प्रयोगः ।

End :

आदित्यमुपस्थाय समित्पाणयः विहारदेशं गत्वा योऽस्यादि आपो अन्वचारिषमित्यन्तं विष्ण्वतिक्रमादि ब्राह्मणतर्पणान्तं समानम् ॥

Colophon :

समाप्ता च सौत्रामणिः ॥

No. 1116. सोमप्रयोगः
SŌMAPRAYŌGAḤ.

Substance, palm-leaf. Size, 14½ × 1¾ inches. Pages, 321. Lines, 5 on a page. Character, Nandināgarī. Condition, slightly injured. Appearance, old.

Begins on fol. 9*a*. The other works contained herein are: Kratuprāyaścitta fol. 1*a*, Yajñavidhi 162*a*. Siddhivināyakavrata (Skānda) 183*a*, Svarṇagaurīvrata (Skānda) 188*b*, Aptōryāmarṣichandōdēvatā 190*a*, Sarvatōmukhaprayōgarṣichandōdēvatā 197*a*.

The work gives the Prayōga relating to six Sōma sacrifices, *viz.*, Agniṣṭōma 9*a*, Ukthya 72*a*, Ṣōḍaśī 82*a*, Vājapēya 84*a*, Atirātra 102*a*, and Aptōryāma 115*a*.

Beginning:

अथ अग्निष्टोमसंस्थस्य ज्योतिष्टोमस्यैवं समन्त्रकप्रयोगः । ऋत्विगार्षेयोऽनूचानः साधुचरण इत्यादिसूत्रोक्तलक्षणावृत्विग्याज्यौ । यज्ञशर्मा ज्योतिष्टोमेन रथन्तरपृष्ठेन द्वादशशतदक्षिणेन सोमेन यक्ष्यते ।

* * * *

गायन्ति त्वेत्युद्वंशीयस्य अनुष्टुप्छन्दः । विश्वे देवा ऋषयः अग्निर्देवता । इन्द्र इत्यन्ये ॥ गां गो त्वां गां णा आ । अकः इणाः ।

* * * *

उचप् . चाखिरोमिहामूइ ॥ छे ॥ समन्त्रकः अग्निष्टोमप्रयोगस्समाप्तः ॥

बृहत्पृष्ठप्रयोगः । अथ बृहत्पृष्ठपक्षे प्रयोग उच्यते । यदुक्तमार्षेयकल्पेन अग्यूवती प्रतिपत् बार्हतान्याज्यानि पृष्ठं शयितं ब्रह्म साम

शृध्यमुष्णिसमानमितरं ज्योतिष्टोमेनेति अग्न्यूवती प्रतिपत् । पवस्व वाचो-अग्रिय इति तृचम् ।

*　　*　　*　　*

नार्मेधचमसभक्षणान्ते स्तोमविमोचनाद्युक्थ्यविषयाणि विकल्पान्त-राणि ऊहकल्पे वक्ष्यते(न्ते) ॥ इत्युक्थ्यसंस्थो ज्योतिष्टोमः ॥

अथ षोडशिनः कर्मोच्यते । सर्वमग्निष्टोमवत् । विश्वरूपाज्योतिर्गो-त(न)योर्निवृत्तिः ।

*　　*　　*　　*

स्तोमविमोचनादि सर्वं पूर्ववत् । इति षोडशी(शि)संस्थः ॥

अथ संस्थावाजपेय उच्यते । प्रथमं संस्थावाजपेयं षोडश्यन्तम-विकारेण कृत्वा चमसं भक्षयित्वा समस्तोपस्थानं कृत्वा.

*　　*　　*　　*

प्रस्वानासो नवर्चं च उपहव्ये निरुक्तके ।
वाजपेये तथैवोक्तं कल्पकारेण तत्र तु ॥

समाप्तो वाजपेयः ॥

अतिरात्रस्य कर्म षोडशिसाम्न ऊर्ध्वं रात्रिपर्यायैः स्तुवीरन् ।

*　　*　　*　　*

सन्धौ च सन्धिषा(सा)म्नां च सपराचीति विश्रुतिः ।
पृथक्तृचेभ्यो हिङ्कारं तिरोऽह्नस्येति चक्रतुः ॥
अतिरात्रं समाप्तम् ॥

ज्योतिष्टोमस्याप्तोर्यामसंस्था विद्यन्ते(ते) ।

ज्योतिरप्तोर्यामसंस्था चतुष्टोमसमन्विता ॥
अतिरात्रं यथापूर्वं सन्ध्यन्तं कृत्वा .

End:

समन्त्रकसर्वपृष्ठाप्तोर्यामं सम्पूर्व(र्ण)म् । अग्निष्टोमाद्यप्तोर्यामपर्यन्तं समन्त्रकप्रयोगस्समाप्तः ॥

No. **1117.** सोमप्रयोगः.

SŌMAPRAYŌGAḤ.

Pages, 21. Lines, 8 on a page.

Begins on fol. 31*a* of the MS. described under No. 1049.

Contains the Prayōga relating to six Sōma sacrifices, *viz.*, Ukthya 31*a*, Ṣōḍaśī 32*b*, Atyagniṣṭōma 33*b*, Atirātra 34*a*, Aptōryāma 35*b*, and Sarvapṛṣṭhāptōryāma 36*a*.

Beginning:

उक्थ्यष्षोडश्यतिरात्रोऽप्तोर्यामस्याग्निष्टोमविकाराः । तेषामग्निष्टोमवत् कल्प उक्ताश्च विकारा यथासदः । क्रतुकरणं क्रतुपशवः । उक्थ्यग्रहस्तृतीयसवने गृहीतव्या इत्यर्थः । तस्य कर्मोच्यते । सोमेन यक्ष्ये—ज्योतिष्टोमेनोक्थ्येन बृहत्साम्ना द्वादशशतदक्षिणेन पशुमान् भूयासमिति सङ्कल्पः.

End:

दिने दिने परिहरेन्निशायां वसतीवरीः ।
इत्यादि सौमिकं कर्म सुब्रह्मण्यां विना निशि ॥
महारात्रे प्रबोधादि नित्यं सौमिकमाचरेत् ।
अहन्यहन्येवमेव घृतन्यक्तानि सर्वशः ॥
विश्वजित्यतिरात्रे तु पृष्ठानां धर्ममाचरेत् ॥

No. 1118. सोमकारिका.

SŌMAKĀRIKĀ.

Pages, 40. Lines, 9 on a page.

Begins on fol. 11*b* of the MS. described under No. 1098.

Complete.

The author is Vāsudēvadīkṣita. The work contains in verse the Prayōga relating to Sōma sacrifices.

Beginning :

आपस्तम्बमुनिं नत्वा वासुदेवाध्वरी सुधीः ।
दर्शादिकल्पसूत्रा(णां) कारिकास्तनुते शुभाः ॥
सोमेण(न) यक्ष्यमाणस्य यस्य पित्रादयस्त्रयः ।
नेजिरे सोमयागेन स स्याद्विच्छिन्नसोमपः ॥
कात्यायन(नो) द्विपुरुष(षं) सो(म)विच्छेदने सति ।
विच्छिन्नसोमप इति कात्याचार्य(स्तु) मन्यते ॥
आलभेत स ऐन्द्राग्नमवशीर्णगवं पशुम् ।
कलौ युगे भवेच्छागो भरद्वाजमुनेर्मतात्(तम्) ॥
यस्य वेदश्च वेदी च विच्छिद्येते त्रिपूरुषम् ।
स वै दुर्ब्राह्मणो नाम यश्चैव वृषलीपतिः ॥

End :

तत्र कालातिक्रमेऽपि न प्रायश्चित्तमिष्यते ।
नैवारम्भोऽग्निहोत्रस्य रात्राविति तु के चन ।
रात्रावपि तदारम्भस्सम्प्रदायातु(त्तु) लभ्यते ॥

Colophon :

इति श्रीसर्वतन्त्रस्वतन्त्रेण श्रीवासुदेवदीक्षितविदुषा विरचितास्सोमकारिकास्समाप्ता(:)[नि] ।

No. 1119. अग्निष्टोमप्रयोगः.

AGNIṢṬŌMAPRAYŌGAḤ.

Substance, palm-leaf. Size, $16\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 176. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

Contains the Prayōga connected with the five Praśnas, 10 to 14, of Āpastambaśrautasūtra. It treats of the Agniṣṭōma-sacrifice, which is one of the seven Sōma-sacrifices. The five Praśnas treating of this sacrifice are sometimes called Sōmapancaka.

Beginning:

सोमप्रयोग उच्यते। वसन्ते पौर्णमास्याममावास्यायां वा सुत्या यथा स्यात्तथोपक्रमः कर्तव्यः। एका दीक्षा(इति)पक्ष एकादश्यामुपक्रमः, तिस्रो दीक्षाः (इति)पक्षे नवम्यामुपक्रमः। यस्य पित्रादयोऽनिष्टप्रथमयज्ञाः स ऐन्द्राग्नेनेष्ट्वाथाश्विनेनेष्ट्वाथ सोमेन यजेतापि वाग्नीषोमीयस्योपालम्भ्यौ कुर्यात्तत्रैवं सङ्कल्पः।

End:

वाचस्पतये ब्रह्म . दम् । तम . . परित्यज्य सङ्कल्पं करोति-सायमग्निहोत्रं होष्यामि । धृष्ट्यादानादिमार्जनान्तं काले प्रातर्होमः । सन्तिष्ठतेऽग्निष्टोमोऽग्निष्टोमः ॥

Colophon:

सोमपञ्चकं समाप्तम् ॥

No. 1120. अग्निष्टोमप्रयोगः.

AGNIṢṬŌMAPRAYŌGAḤ.

Substance, palm-leaf. Size, $20 \times 1\frac{1}{2}$ inches. Pages, 145. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

The Prayōga herein is in accordance with the five Praśnas of Āpastambaśrautasūtra, 10 to 14.

Begins on fol. 1*a*. The other work herein is Agniṣṭōmāvabhṛtaprayōga 74*a*.

Beginning :

शो(सो)मेन यक्ष्यमाणो ब्राह्मणानार्षेयानृत्विजो वृणीते—यूनस्स्थविरान् वानूचानानूर्ध्ववाचोऽनङ्गहीनान्। तेभ्यस्सोमं प्राह—त्रिपूर्ष(रुष)विच्छिन्नसोमपीथसधा(न्धा)नार्थम् ऐन्द्राग्नं पशुं दौर्ब्राह्मण्यनिर्हरणार्थम् आश्विनं पशुञ्चाग्नीषोमीयेण सहोपलम्भ्यौ कुर्वन् सोमेन यक्ष्ये ।

End :

वाचस्पतये ब्रह्मण इदं, ततोऽग्नित्यागः, ततः सायमग्निहोत्रं होष्यामि। धृष्टिरसि इत्यादि भूर्भुवस्सुवरिति सादनं काले प्रातर्होमं(मः) सन्तिष्ठतेऽग्निष्टोमोऽग्निष्टोमः ॥

भावनामसंवत्सरमार्गशिरबहुळद्वादशीसोमवासरे सोमपञ्चकं सम्पूर्णम् ॥

No. 1121. अग्निष्टोमप्रयोगः.

AGNIṢṬŌMAPRAYŌGAḤ.

Pages, 88. Lines, 20 on a page.

Begins on fol. 1*a* of the MS. described under No. 1067.

Contains the Prayōga of the Agniṣṭōma-sacrifice as dealt with in Praśnas 10 to 12. That of the remaining two Praśnas are contained in the MS. described under the next number. Same as the last.

Beginning :

सोमेन यक्ष्यमाणो ब्राह्मणानार्षेयानृत्विजो वृणीते—यूनस्थविरान्वानूचानानूर्ध्ववाचोऽनङ्गहीनांस्तेभ्यस्सोमं प्राह। अपरेण गार्हपत्यं दर्भेष्वासीनो दर्भान्धारयमाणः.

* * * *

अथ यजमानो द्रव्यनिर्देशं करोति। अथ मन्त्रवरणम्। सोमेन यक्ष्यमाणः।

(एकादशप्रश्नप्रारम्भः)

प्रवर्ग्यं सम्भरिष्यन्नमावास्यायां पौर्णमास्यां वा पूर्यमाणपक्षस्य वा पुण्ये नक्षत्रे तूष्णीं काण्टकीं समिधमाधाय युञ्जते मन उत युञ्जते धिय इति चतुर्गृहीतं जुहोति।

* * * *

द्वाभ्यां गार्हपत्यमुपतिष्ठन्ते इममू षु त्यमस्मभ्यꣳ सनिम्। गायत्रन्नवीयाꣳसम्। अग्ने देवेषु प्र वोचः। आहवनीये जुहोत्युपतिष्ठन्त इत्येके॥

(द्वादशप्रश्नप्रारम्भः)

आहवनीये प्रणयनीयमिध्ममादीप्य सिकताभिरुपयम्य अग्नये प्रणीयमानायानुब्रूहि उद्यम्याग्निमाहवनीये उद्यतहोमं जुहोति।

End:

विष्णोरराटमसि। इरावती धेनुमती। प्रोक्ष्य बर्हिस्त्रिर्वेदिं प्रोक्षति आहवनीये प्रणयनीयम्॥

No. **1122.** अग्निष्टोमप्रयोगः.

AGNIṢṬŌMAPRAYŌGAḤ.

Pages, 128. Lines, 17 on a page.

Begins on fol. 1*a* of the MS. described under No. 1066.

Contains the Prayōga of the Agniṣṭōma - sacrifice as described in Praśnas 13 and 14. This completes the work described under the last number.

Beginning :

महारात्रे ब्रह्मणि सहबुध्वाचान्तोऽध्वर्युः । अग्ने नय . विधेम । आग्नीध्रमण्टपमभिमृशति । इदं विष्णुर्वि . सुरे । हविर्धानम् । अग्न आयूंषि पवसे . . दुच्छुनाम् । स्रुचः प्रचरणीं वाजिनपात्रञ्च । आ वायो भूष . . . पूर्वपेयम् । वायव्या वि . . आघाये अग्निमिन्धते ।

End :

इदं विष्णुः . . . समूढमस्य पांसुरे स्वाहा । अन्तर्वेद्यूर्ध्वस्तिष्ठन् जुहोति । विष्ठ(ष्ण) व इदम् । सा यावद्रात्रेस्सन्तिष्ट(ष्ठ)ते । अथ सायमग्निहोत्रं जुहोति । काले प्रातर्होमं (मस्)सन्तिष्ठते । नाग्निष्टोमोऽग्निष्टोमः ॥

No. 1123. अग्निष्टोमप्रयोगः.

AGNIṢṬŌMAPRAYŌGAḤ.

Pages, 176. Lines, 8 on a page.

Begins on fol. 14*a* of the MS. described under No. 1051.

Complete.

This also closely follows Āpastambaśrautasūtra, Praśnas 10 to 14. This is like the last.

No. 1124. अग्निष्टोमप्रयोगः.

AGNIṢṬŌMAPRAYŌGAḤ.

Substance, palm-leaf. Size, $17\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 198. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

This Prayōga of the Agniṣṭōma-sacrifice resembles that which is gvien in another work of the same name, described under No. 88 of the India Office Library Catalogue.

Beginning :

आगूर्विद्युत्प्रचकवरणं तेन होतॄन् वृणीते
मन्त्रैः पर्कस्सुरगणनुतिश्श्राद्धमारोप्य याति
एधं यष्टुर्मथनविभजेऽग्निर्यजुर्भिः प्रणीते
सोमे वेक्षस्त्वजिनविहृतिस्सप्तहोताहुति(र)स्वे ॥
आज्यकुम्भयवव्रीहीन् तण्डुलान्वा तथाञ्जनम् ।
नवनीतं त्रिवृत्पृथ्वी विषाणं जालमेव च ॥
योक्त्रन्दण्डञ्च वस्त्राणि तन्तुदर्भास्तथैव च ।
भूमपुञ्जिलसोमांश्च कृत्तिः कृष्णमृगस्य च ॥
पात्राणि परशुर्दात्रं कार्ष्णाजिनधवित्रकम् ।
रुक्मापूर्णास्तुका(स्नुच?)श्चैव व्रतार्थं चमसद्वयम् ॥
लौकिक्यावरणी नेयौ यागार्थगमने तथा ।

अपरेण गार्हपत्यं दर्भेष्वासीनो दर्भान् धारयमाणः पत्न्या सह प्राणानायम्य, सङ्कल्पङ्करोति – त्रिपूरुषविच्छिन्नसोमपीथसन्धानार्थम् ऐन्द्राग्नं पशुं दौर्ब्राह्मण्यनिर्हरणार्थम् आश्विनं पशुञ्चाग्नीषोमीयेण पशुना सहोपालम्भ्यौ कुर्वन् सोमेन यक्ष्ये। ज्योतिष्टोमेनाग्निष्टोमेन रथन्तरसाम्नैकविंशतिदक्षिणेन तेन श्रीपरमेश्वरं प्रीणयानि । एवं पत्नी कुर्वती सोमेन यक्ष्ये । विद्युदसि । द्विः ममास्मिन् ज्योतिष्टोमेऽग्निष्टोमे सोमे सोमप्रवाकं त्वां वृणीमहे। वृतोऽस्मि करिष्यामीति सोमप्रवाकः । यजमानः.

End :

इदं विष्णुः . सुरे स्वाहा विष्णव इदम् । अथ सायमग्निहोत्रं जुहोति । काले प्रातर्होमस्सन्तिष्ठतेऽग्निष्टोमोऽग्निष्टोमः ।

* * * *

अग्निहोत्रमारप्स्यमाणो दश होतारं होष्यामि । चित्तिस्स्रुक्—आस्मासु नृम्णं धात्स्वाहा वाचस्पतये ब्रह्मण इदम् ॥ अथाग्निहोत्रम् ॥

भावसं . . . भाद्रपदशुद्धसप्त ॥

No. 1125. अग्निष्टोमप्रयोगः.

AGNIṢṬŌMAPRAYŌGAḤ.

Substance, palm-leaf. Size, $18\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 120. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete.

Contains the Prayōga of the Agniṣṭōma-sacrifice (as in the above mentioned five Praśnas, 10—14).

Same as the last.

No. 1126. अग्निष्टोमप्रयोगः.

AGNIṢṬŌMAPRAYŌGAḤ.

Substance, palm-leaf. Size, $15\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 180. Lines, 7 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Complete.

Same as the preceding.

No. 1127. अग्निष्टोमप्रयोगः.

AGNIṢṬŌMAPRAYŌGAḤ.

Substance, paper. Size, $8\frac{1}{2} \times 6\frac{3}{8}$ inches. Pages, 77. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new. Copied for the Library in 1894.

Complete.

Contains the portion relating to the Yajamāna of the sacrifice. This is said to have been composed by Purusōttamabhaṭṭa, son of Dēvarājārya.

Beginning:

यज्ञेश्वरं विभुं देवं यज्ञानां फलदायिनम् ।
श्रीभूमिनीलासहितं नौमि सर्वार्थसिद्धये ॥

पुरुषोत्तमभट्टेन देवराजार्यसूनुना ।
अग्निष्टोमादिक्लृप्तिस्सुस्पष्टं क्रियतेऽधुना ॥

अग्निष्टोमप्रयोगः तत्र याजमानम् अग्निर्देवो देवहोतेति अमुकशर्मणः सोमो भविष्यति इत्युक्ते तत्रभवतौद्गात्रं कर्तव्यमित्युक्ते उद्गाता आधानादिषु कर्मसु क ऋत्विजः नारायणशर्मादय इत्युक्ते उद्गाता के याजयन्ति ते चान्ये च इत्युक्ते उद्गाता.

End:

इं चारवर्गिशेराम्नपाश्रुखूतान आ ऊपा ऊप् चाखिरोमिहाइ । इति यज्ञपुच्छं सर्वक्रतूनां समानम् ॥

Colophon:

इत्यग्निष्टोमप्रयोगः ॥

No. 1128. अग्निष्टोमप्रयोगः.

AGNISṬŌMAPRAYŌGAḤ.

Substance, palm-leaf. Size, $18\frac{3}{4} \times 1\frac{1}{2}$ inches. Pages, 251. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Incomplete.

The first and the last leaves are injured. The work is similar to the last.

Beginning :

त्रिपू(रु)षसोमपीथविच्छेदार्थम् ऐन्द्राग्नं पशुं दौर्ब्राह्मण्यनिर्हरणार्थम् आश्विनं पशुश्च अग्नीषोमीयेन पशुना सहोपालभ्यं(म्भ्यं) कुर्वन् सोमेन यक्ष्ये । ज्योतिष्टोमेनाग्निष्टोमेन रथन्तरसाम्ना एकविंशतिदक्षिणेन तेन परमेश्वरं प्रीणयानि ।

End :

यमिन्द्रमाहुर्वरुणं यमाहु(र्यं मित्रमाहु)र्यमु सत्यमाहुः । यो [दवानां]देवानान्देवतप(म)स्तपोजाः । तमा(स्मा)इन्द्राय सुतमा(जु)होमि स्वाहा इन्द्रायेदम् । वषट्कृते जुहोमीति स्वाहा व(ष)डिन्द्राय । अग्नये स्विष्टकृत इदम् । वषट्कृतानुवषट्कृते हुत्वा हरति भक्षम् । तं भक्षयथ प्रवर्गकर्तरस्तस्यारण्येऽनुवाक्यो भक्षमन्त्रः होताध्वर्युर्ब्रह्मा प्रतिप्रस्थाताग्नीध्रयजमानश्च ॥

No. **1129.** अग्निष्टोमप्रयोगः.

AGNIṢṬŌMAPRAYŌGAḤ.

Substance, palm-leaf. Size, $14\frac{3}{8} \times 1\frac{1}{8}$ inches. Pages, 192. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, old. The first two leaves are half torn.

Contains the Prayōga according to the Śrautasūtra, Praśnas 13 and 14. The latter part, however, is incomplete.

Beginning :

महारात्रे बुध्वा महारात्रे बुध्यमानेषु=ब्रह्मा बुद्धा (अग्ने नय सुपथा) राये अस्मान्विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नम उक्तिं विधेम ।

End :

तस्य(ा)मेव स्थाल्यां संनिष्कासितायां श्रपयति । तद्बर्हिस्तन्मे क्षणम् । श(ा)लमुखीये प्रचरन्ति । उत्तरेण गार्हपत्यमित्यादिप्रस्तरमानी(य) पूर्वस्मिन्निदधाति बर्हिषि निदधाति । अत्र व्रतप्रवेशनम् । प्रस्तराहरणादिपात्रसादनकाले प्रायणीयाय स्थालीश्च स्फ्यश्च द्वन्द्वमितराणि प्र ॥

No. 1130. चयनप्रयोगः.
CAYANAPRAYŌGAḤ.

Pages, 121. Lines, 8 on a page.

Begins on fol. 10*a* of the MS. described under No. 1055.

Contains the Prayōga relating to the two Praśnas, 16 and 17, of Āpastamba-Śrauta-Sūtra, which treat of the construction of altars and of the rites connected therewith.

Beginning:

चयनप्रयोग उच्यते—अग्निश्चेष्यमाणः । अग्निरितीष्टकाकृतं स्थण्डिलमुच्यते तश्चेष्यमाणस्त्र्यहादिदीक्षापक्षे उखासम्भरणप्रभृत्यामिक्षापर्यन्तानि कर्माणि वसन्ते यथा भविष्यन्ति पर्वण्युखासभ(म्भ)रणपक्षे एकाष्टकायाञ्चेत्तस्यामुखासम्भरणं पश्चिष्ठ्यादि सर्वं वसन्ते चतुरो मासा । इत्यस्मिन् पक्षे एकाष्टकायाञ्च लभ्यते ।

साग्निचित्यस्य क्रतोः प्रयोग उच्यते—पर्वणोरेकाष्टकायां वा प्रातरग्निहोत्रं हुत्वा प्राणानायम्य सङ्कल्पं करोति—द्वादशाहेनाहीनभूतेन साग्निचित्येन सर्वपृष्ठेन सर्वस्तोमेनान्वहं द्वादशशतदक्षिणेन प्रजायेयं स्वर्गं लोकमवाप्नवानि । विद्युदसि । अस्मिन्नहीनभूतद्वादशाहे सोमप्रवाकं त्वां वृणीमहे । भविष्यामि । सोमप्रवाक सोमम‍ृत्विग्भ्यः प्रब्रूहि । देवदत्तशर्मणो द्वादशाहो भविष्यति तत्रभवताध्वर्यवं कर्तव्यमित्यादि ।

End:

अग्निचित् वर्षति न धावेत् । यस्माद्देशाद्धावनं कृतं तत्स्थानमावर्तयते । वायव्येन पशुनेष्ट्वा संवत्सरादर्वाक् सोमेन यजेत नान्यस्यामपि स्त्रीणामुपगमनं क्षत्रियवैश्यविषयं पक्षिमांसप्रतिषेधश्च ॥

Colophon:

पर्याप्तोऽयं साग्निचित्यः क्रतुः ॥

* * * *

No. 1131. चयनप्रयोगः.

CAYANAPRAYŌGAḤ.

Pages, 111. Lines, 20 on a page.

Begins on fol. 217*a* of the MS. described under No. 237.

Complete.

This work gives the ritualistic procedure relating to the seven kinds of Cayana or the arrangement of bricks for building the altar; viz., Vikṛtisarvakratu 217*a*, Kāṭhaka-Sāvitra 223*a*, Nācikēta 229*a*, Caturhōtrīya 230*b*, Vaiśvasṛja 231*b*, Maitrāvaruṇa 233*a*, Āruṇakētuka 234*a*. The colophon at the end of the work attributes it to the authorship of Rāmacandrādhvarīndra.

Beginning:

अथ चयनप्रयोगः। विकृतिषु सर्वेषु क्रतुषु चयनं प्रकृतावपि के चिदिच्छन्ति। प्रथम(मं) प्रवर्ग्योपसदौ कृत्वा सुब्रह्मण्याह्वानं षडहे पञ्चाहे चतुरहे त्र्यहे द्व्यहे श्वस्सुत्यामिति विशेषः। आह्वानान्ते महाग्निं चिन्वन्ति तस्मिंश्चीयमाने पश्चिमेन पुच्छं गत्वा दक्षिणेऽपिकक्षे तिष्ठेत्। अपिकक्षः आत्मपक्षयोः सन्धिप्रदेश इत्यर्थः।

End:

इरा ५ इद १ त्राणि पूरू २३ भो २ हि १० मा इजा १२ सा ३२३४ औ ५ होवावा ३२३४ सू ५.

Colophon:

इति श्रीविकृतिसर्वक्रतुषु चयनप्रयोगस्समाप्तः ॥

Beginning:

काठकचयने सावित्रम्—

अथ काठका उच्यन्ते। प्रथमं तावत् सावित्रकर्मोच्यते। सावित्रमिति चित्योऽग्निः पशुबन्धे विधीयते। अमावास्यायां पौर्णमास्यां चतु-

दश्यां वा प्रातरग्निहोत्रं हुत्वा प्राणानायम्य सङ्कल्पः—ऐन्द्राग्नेन निरूढपशुबन्धेन यक्ष्ये । समारोप्य देवयजनं गत्वा मथित्वोपावरोह्यायतने निधाय, विद्युत् । अथाग्निसङ्कल्पः—सावित्रमग्निं चेष्ये स्वर्गं लोकमवाप्नवानि इति उक्त्वा शर्कराणामुपकल्पनं पञ्चाशीतिशतमित्यादि ।

End :

मन्त्रेण प्रतिग्रहः समुत्क्रम्येत्यादिनिरूढपशुबन्धवत् ब्राह्मणतर्पणान्तम् अनन्तरे सौत्रामण्या वा पशौ नित्ये काम्ये चाहीने सत्रे विधीयते । सन्तिष्ठते सावित्रः ॥

Beginning :

काठकचयने नाचिकेतम्—

एतेन नाचिकेतव्याख्यानम्—तस्य कर्म चतुर्दश्यां वा प्रातरग्निहोत्रं हुत्वा, विद्युदसि । अथाग्निसङ्कल्पः--पुनः प्राणानायम्य नाचिकेतमग्निं चेष्ये स्वर्गं लोकमवाप्नवानीति । उपकल्पनकाले एकविंशतिहिरण्येष्टकाः तत्सङ्ख्या शर्कराणां वोपकल्पनम् ।

End :

अग्निर्मे वाचि श्रितः । अन्तस्तिष्ठत्वमृतस्य गोपाः इत्यनुवाकसमाप्तेर्ब्रूयात् । अग्निरौपयजानीत्यादि समानं सावित्रवत् मैत्रावरुण्यामिक्षा च ॥

समाप्तो नाचिकेतः ॥

Beginning :

काठकचयने चातुर्होत्रियम्—

एतेन नाचिकेत(तेन)चातुर्होत्र(:)व्याख्यातः—तस्य कर्म चतुर्दश्यां वा प्रातः . . . पशुसङ्कल्पः, समारोप्य देवयजनं गत्वा निधाय, विद्युदसि । अथाग्निसङ्कल्पः—चातुर्होत्रमग्निं चेष्ये स्वर्गं लोकमवाप्नवानीति । यावत्पदं हिरण्येष्टकाः यजुष्मत्यः.

End :

एवं षडशीतिसप्ततिः स्वयमातृण्णादिब्राह्मणतर्पणान्तं नाचिकेतवनी-(वन्मै)ता(त्रा)व[ा]रुण्यामिक्षा च ॥

समाप्तश्चातुर्होत्रः ॥

Beginning :

काठकचयने वैश्वसृजम्—

एतेन चातुर्होत्रेण वैश्वसृज(जं)व्याख्यातः (तम्)—तस्य पूर्ववत्कल्पः। चतुर्दश्यां प्रातरग्निहोत्रं हुत्वा पशुसङ्कल्पः, समारोप्य दे . . . निधाय, विद्युदसि । अथाग्निसङ्कल्पः—वैश्वसृजमग्निं चेष्ये स्वर्गं लोकमावाप्नवानीति । द्विचत्वारिंशद्धिरण्येष्टकाः तावतीश्शर्करा वाभ्यक्ताः पूर्ववद्दधिमध्वादीनामुपकल्पनम्.

End :

तस्माद्विश्वसृजोम् । विश्वमेनाननुप्रजायते । समानलोकतां यन्तो(म्) । य एतदुपयन्ति । ये चैनत् . येभ्यश्चैनत्प्राहोम् ॥

Beginning :

काठकचयने मैत्रावरुणम्—

मैत्रावरुण्यामिक्षेष्ट्या यक्ष्ये । विहरणादि । अद्य यज्ञाय । इमामूर्जम् । आमिक्षां हविः । इषे त्वा ऊर्जे त्वा इमां प्राचीं पशुपामहं व्रतप्रवेशः पयस्वतीः आदित्योपस्थानान्ते उत्तरेण गार्हपत्यमित्यादि.

End :

अन्वाहार्यो दक्षिणासंस्रावान्ते वाजिनयागः । चातुर्मास्येषु वैश्वदेवपर्वण्युक्तं यज्ञशंश्रमवर्जं ब्राह्मणतर्पणान्तम् ॥

Beginning :

काठकचयने आरुणकेतुकम्—

यो ब्रह्मणे सृष्टिविधायिने पुरा
महाजले स्वान्तनुमाश्वदर्शयन्(त्) ।

सहस्रशीर्षाक्षिपदाय पूरुषा-
भिधाय कूर्मारुणकेतवे नमः ॥

अथापस्तम्बीयारुणकेतुकाग्नेः प्रयोगो वक्ष्यते। तत्रादावारुणकेतुकश-ब्दस्य निर्वचनम् । तं वा एतमरुणाः केतवो वातरशना ऋषयोऽचि-न्वन् । तस्मादारुणकेतुक इति। तत्रापस्तम्बः । आरुणकेतुको ब्राह्मण-व्याख्यात इति अस्यार्थः आरुणकेतु(क): पञ्चमः काठको नित्यः स ब्राह्मणव्याख्यातः प्रायेण ब्राह्मणो व्याख्यात इति। केभ्यः पञ्चमः कथं नित्य इत्यत आह.

End :

व्रतं समाप्य कर्मेश्वरार्पणं कृत्वा ब्राह्मणान् भोजयेत् । सन्तिष्ठत आरुणकेतुकः ।

वह्नेरारुणकेतुके(तो)र्यत्प्रयोगस्य निरूपणम् ।
प्रणीतं रामचन्द्रेण पुरुषः तेन तुष्यन्ति(तु) ॥

Colophon :

इति श्रीवेदविहितसकलधर्मानुष्ठानतत्परसमस्तदेवरथप्रवर्तकश्रीमहोपा-ध्यायरामचन्द्राद्ध्वी(ध्वरी)न्द्रेण विरचितापस्तम्बीयारुणकेतुकाग्नेः प्रयो-ग(र)समाप्तः ॥

No. **1132.** आरुणकेतुकचयनम्.

ĀRUṆAKĒTUKACAYANAM.

Pages, 7. Lines, 5 on a page.

Begins on fol. 61*a* of the MS. described under No. 1048.

Complete.

Ritual relating to the Āruṇakētukacayana, one of the seven kinds mentioned under the last number.

Beginning:

एतेनारुणकेतुको व्याख्यातः—यावन्मात्रमबीष्टका लोकम्पृणाश्चतस्रः स्वयमातृण्णाश्चाप एव पुष्करपर्णं रुक्मं कूर्मं हिरण्मयं पुरुषमित्यातपति । वर्प्यादि यथा समाम्नातं पल्वल्या अशोप्या इत्युक्तमुत्तरवेद्या निवपनकाले तूष्णीं जानुदघ्नीं खात्वान्यत्र मृदं निदधाति ।

End:

इदं सर्वमिति ब्राह्मणं ब्रह्म वा आपो यदाप उपधीयन्ते । ब्रह्म चैतदात्मन्धत्ते । ब्रह्मणस्सायुज्यमाप्नोति । य एतमग्निं चिनुते । सन्तिष्ठत आरुणकेतुक आरुणकेतुकः ॥

विक्रमोर्जसिताष्टम्यां लिखत्यारुणकेतुकम् ।

No. 1133. लोष्टचयनम्.
LŌṢṬACAYANAM.

Pages, 16. Lines, 20 on a page.

Begins on fol. 280*b* of the MS. described under No 237.

Complete.

This treats of the ceremony of arranging clods of earth on the spot where an Agnihōtrin has been cremated.

Beginning:

महाग्निचितः काठकचितो वा लोष्ठ(ष्ट)चयनं कुर्यात् । दशाहप्रभृति अयुङ्क्ष्वहस्सु अहोरात्रार्धमासमासर्तुसंवत्सरे वा लोष्टचितिः कर्तव्या । चितिदिनात्प्रपूर्वेद्युः कर्ता स्म(श्म)शानदेशं गत्वा प्राचीनावीती प्राणानायम्य पितुर्गोत्रस्य शर्मणः लोष्टचयनं करिष्ये इति सङ्कल्प्य षड्नवपक्षमाश्रित्य प्रयोगः.

End:

तूष्णीमाहवनीये जुहोति । प्रजापतय इदम् । एष विधिर्विधुरस्याहिताग्नेरपि ॥

समाप्तः

स्त्रीणां सापिण्ड्यादिनिर्णयः । स्त्रीणां भर्तृसापिण्ड्यमेव कार्यम् । न तु श्वशुरादिसापिण्ड्यम् । तथा च सुमन्त(न्तुः)—

भ(र्तु):पित्रादिसापिण्ड्यं भर्त्रैकेन सह स्त्रियाः ।
अनपत्यास्त्रिया एतदिति यत्तत(द)साम्प्रतम् ॥

Colophon:

लोष्टचयनं समाप्तः(प्तम्) ॥

No. **1134.** चयनोपस्थानम्.

CAYANŌPASTHĀNAM.

Pages, 24. Lines, 18 on a page.

Begins on fol. 46*a* of the MS. described under No. 1039.

Complete.

The final prayer in the Cayana - rite, as used in the various sacrifices and as adapted to the various castes.

Beginning:

तत्र ज्योतिष्टोमो द्विविधः रथन्तरपृष्ठको बृहत्पृष्ठकश्चेति । तत्र ब्राह्मणस्य प्रथमे ज्योतिष्टोमप्रयोगे रथन्तरमेव पृष्ठं द्वितीये बृह(त्) तृतीये रथन्तरमित्येवमजामित्वाय बृहद्रथन्तरयो(र्व्य)त्यास इत्याहुः । आर्षेय-कल्पे न तु त्रयो वर्णाल्पा इत्यादिना ब्राह्मणस्य सर्वदा रथन्तरमेव पृष्ठं क्षात्रियस्य बृहदेवेत्युक्तम् । अत्र बृहत्पृष्ठस्तु ज्योतिष्टोमस्येत्थं प्रयोगः प्रदृश्यते ।

End:

अस्य च गानप्रकारः पूर्वस्मिन् ज्योतिष्टोमे प्रवर्गोद्वासान्ते प्रदर्शितः । रथचक्रादिषु द्वयनेषु पक्षपुच्छश्चाद्यभावेन तत्तत्प्रदेशे गानमिति विशेषः । समान अग्निष्टोमेन इति साग्निचित्यस्य विशेषः ।

Colophon:

चयनोपस्थानं समाप्तम् ॥

No. 1135. सावित्रम्.
SĀVITRAM.

Pages, 15. Lines, 7 on a page.

Begins on fol. 99*a* of the MS. described under No. 1035.

Complete.

This is also a work on Agnicayana.

Beginning :

सावित्रं स्वर्गकामश्चिन्वति । पशुबन्धैश्चीयते । पशुबन्ध . . . . . मात्मन्यरण्योर्वाग्निं समारोप्य यागदेशं गत्वा उद्धृत्यावोक्ष्यायतने निधायोपावरुह्य विद्युदसि . मि.

End :

वाजिनां भक्षो अवत्विति भक्षणमन्त्रः । हविश्शेषभक्षणादि इदं हविरिति यजमानभागं(ग) प्राशनम् । यज्ञो बभूव यज्ञशं च मे वर्जे ब्राह्मणतर्पणान्तम् ॥

Colophon :

सावित्रं पर्याप्तम् ॥

No. 1136. चयनानुक्रमणिका.
CAYANĀNUKRAMAṆIKĀ.

Pages, 50. Lines, 6 on a page.

Begins on fol. 33*a* of the MS. described under No. 1076. This leaf is, however, wrongly numbered as 25.

Complete.

This gives the order of the Mantras to be recited and of the rites to be performed in a Cayana-ritual.

Beginning is wanting.

Beginning :

सजूर्ऋतुभिस्सजूर्विधाभिस्सजूरादित्यैः सजूर्देवैर्व . . . . मिह त्वा तया । सजूर्ऋतुभिः सजूर्विधाभिः सजूर्विश्वैर्देवैः सजूर्देवैर्वयो . .

मिह त्वा तया । सजूर्ऋतुभिस्सजूर्विधाभिस्सजूर्देवैस्सजूर्देवैर्वयो . . मिह त्वा तया । पञ्चर्तव्या आश्विनीरनूपदधाति । प्राणं मे पाहि तया ।

End :

अथ सायमग्निहोत्रं जुहोति काले प्रातर्होमः सन्तिष्ठतेऽग्निः। अग्निं चित्वा सौत्रामण्या यजेत । अपरेद्युर्वा मैत्रावरुण्यामिक्षा च ॥

Colophon :

चयनानुक्रमणिका समाप्तः(प्ता) ॥

No. **1137.** सोमहौत्रम्.

SŌMAHAUTRAM.

Substance, palm-leaf. Size, $14\frac{7}{8} \times 1\frac{1}{8}$ inches. Pages, 203. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

This codex contains also 6 pages of Ādhānaprayōga, which begins on fol. 103*a*, wrongly numbered as 106. It is fragmentary.

Incomplete.

This contains directions for the sacrificial priest, known as Hōtṛ, in respect of the performance of Sōma-sacrifices.

Beginning :

सोमस्य प्रयोगः सोमप्रवाकेन क्रियते । तदा सोमप्रवाकं पृच्छेत् को यज्ञः क ऋत्विजः का दक्षिणा अग्निर्मे(र्म इ)ति वृतो होता महम्मे वोचो भर्गो मे वोचो यशो मे वोचस्स्तोमम्मे वोचः क्लृप्तिम्मे वोचो भुक्तिम्मे वोचस्सर्वम्मे वोचस्तम्मा(न्मा)वतु तम्मा(न्मा) विशतु तेन भुक्षिषीय इति जपित्वा अग्निष्टे होता स नेति हौत्रमभ्युपगच्छेत्। मधुपर्कः विष्टरः पाद्यमर्घ्यमाचमनीयं, मधुपर्कः गौर्विष्टरो विष्टर इति यजमानेनोक्ते, होता—अहं वर्ष्म सजातानां विद्युतामिव सूर्यः इदन्त्वमसि (धि)तिष्ठामि यो मा कश्चाभिदा(स)ति इत्युदगग्रे विष्ट्र(ष्टर) उपविशेत्। पाद्यमिति त्रिः पादप्र

क्षालनम् अर्घ्यमिति त्रिः प्रतिगृह्य प्रोक्ष्य आचमनीयमिति त्रि अपामेकदेशं हस्तेन गृहीत्वा अमृतोपस्तरणमसीति पिबेत्.

End :

स्वेषु क्षयेषु वाजिनोम् । यज्ञेन यज्ञमयजन्त देवाः । तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानस्सचन्त(न्ते) यत्र पूर्वे साध्यास्सन्ति देवाँ त्रिः ॥

No. 1138. सोमहौत्रप्रयोगः.

SŌMAHAUTRAPRAYŌGAḤ.

Substance, palm-leaf. Size, $14\frac{1}{8} \times 1\frac{3}{8}$ inches. Pages, 93. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Incomplete.

This is a work like the last with a few variations in reading.

No. 1139. सोमहौत्रम्.

SŌMAHAUTRAM.

Substance, palm-leaf. Size, $16\frac{3}{8} \times 1\frac{1}{2}$ inches. Pages, 113. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

A work similar to the last.

Beginning :

अथैतस्या रात्रेर्विवासकाले प्राग्वयसां प्रवादात्प्रातरनुवाकायामन्त्रितः वाग्यतः तीर्थेन प्रसाद्य सवनीयस्य पशोस्सप्तदश सामिधेन्यः । वार्त्रघ्ना- वाज्यभागौ अग्निः पशुदेवता वनस्पतिः पृषदाज्यदेवता इन्द्रो वसुमान् प्रातस्सवनदेवता.

End:

अयाश्चेत्यादि हुत्वा ओं च मे स्वरश्च मे यज्ञोपाचिते नमश्च यत्तेस्यो(न्यू)नं तस्मै त उपयत्तेऽतिरिक्तं तस्मै ते नमः ॥

Colophon:

सोमहौत्रं सम्पूर्णम् ॥

युवाब्दे मार्गशीर्षे च शुक्लपक्षे द्वितीयके ।
स्थिरवासरसंयुक्ते सोमहौत्रं लिखेदहम् ॥(?)

No. 1140. सोमहौत्रप्रयोगः.

SŌMAHAUTRAPRAYŌGAḤ.

Pages, 151. Lines, 16 on a page.

This is simply a copy of the MS. described under No. 1137, made in 1895. This begins on fol. 113*a.* of the MS. desrcibed under No. 1058.

On fol. 188*b* begins a work called Ādhānaprayōga extending over 5 pages. As the MS. is fragmentary, no extract is given.

No. 1141. पौण्डरीकहौत्रम्.

PAUṆḌARĪKAHAUTRAM.

Substance, palm-leaf. Size, 17⅝ × 1⅝ inches. Pages, 233. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains the हौत्रशस्त्रसूक्त used in the Pauṇḍarīka sacrifice.

Begins on fol. 1*a*. The other work herein is Ṛgvēdāruṇānukramaṇikā 118*a*.

Beginning:

उपप्रयन्तो अध्वरं—ग्रये । आरे—ण्वतोम् । यः स्त्री—ष्टिषु । अरगयोम् । उत—जनि । धनम्—रणोम् । यस्य—तये ।

* * * *

स त्वमग्ने सौभगत्वस्य विद्वा नस्माकमायुः प्र तिरेह देवोम् । तन्नो मित्रो वरुणो मामहन्तामदितिस्सिन्धुः पृथिवी उत द्योम् ॥

पौण्डरीकहौत्रशस्त्रसूक्तानि समाप्तानि ॥

यस्सत्राह(1) विश्वचर्षणी(णे)रिन्द्रन्तं हूमहे वयम् । सहस्रमुष्म(ष्क)तुविनृम्ण सत्पते भवा समत्सु नो वृधोम् । बाधसे जनान्वृषभेव मन्युना घृषौ मिल्ह[1] ऋचीषम.

End:

अध्वर्युणाहृतमुक्थ्यपात्रमुपहूय भक्षयति । वाग्देवी सोमस्य तृप्यतु । सोमो मे राजायुः प्राणाय वर्षतु । स मे प्राणस्सर्वमायुर्दुहां महत् । तूष्णीमुत्तरं भक्षयित्वा । आत्माभिमर्शनं कृत्वा । सन्तिष्ठते निष्कैवल्यम् ॥

Colophon:

बृहतीसहस्रं समाप्तम् ॥

No. 1142. इष्टिहौत्रम्.

IṢṬIHAUTRAM.

Pages, 19. Lines, 7 on a page.

Begins on fol. 60*a*. of the MS. described under No. 929.

Complete.

A work similar to the last in respect of subject-matter.

Beginning:

अस्या इष्टेः पञ्चदश सामिधेन्यः । वार्त्रघ्नावाज्यभागौ । अग्निर्विष्णुरग्नीषोमाविन्द्रो वैमृधश्च प्रधानदेवताः इति पौर्णमास्यां, वृधन्वन्तावाज्यभागौ । अग्निर्महेन्द्रश्च प्रधानदेवते इत्यमावास्यायाम्। स्विष्टकृत्प्रयाजादयोऽङ्गदेवताः ।

End:

अग्निर्विद्वान् स यजात् सेदु होता सो अध्वरान् स ऋतून् कल्पयाति वौषट् ॥

Colophon:

इष्टिहौत्रं समाप्तम् ॥

No. **1143.** होतृप्रयोगः.

HŌTṚPRAYŌGAḤ.

Substance, palm-leaf. Size, $14\frac{1}{4} \times 1\frac{1}{2}$ inches. **Pages**, 53. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 46*a*. The other works herein are Umāmahēśvarapūjā 1*a*, Āśvinasahasram 3*a*. Contains directions for the Hōtṛ priest in connection with the sacrifices—Sarvapṛṣṭhāptōryāma (46*a*) and Ukthya (61*a*.)

Beginning:

अथ सर्वस्तोमस्य सर्वपृष्ठाप्तोर्यामस्य होतृप्रयोग उच्यते । दीक्षि(क्ष)णीयाद्यग्नीषोमीयान्तं प्रकृतिवत् । सवनीये विशेषः सवनीयानां पशूनां सप्तदश सामिधेन्यः । वा . गौ । अग्निस्सरस्वती सोमः पूषा बृहस्पतिर्विश्वे देवा इन्द्रो मरुत इन्द्राग्नी सविता वरुणश्च पशुदेवताः ।

* * * *

उक्थ्यस्य होतृप्रयोगः । को यज्ञ इत्यादि । न प्रवर्ग्यः सवनीयपशुरैन्द्राग्नवत् । न दधिघर्मम् । आग्निमारुतान्तमग्निष्टोमवत् ।

End:

पिबास्यन्धो . मदायावौ सोमस्याग्ने वीहि वौ ॥

Colophon:

होतुरुत्तमपर्यायस्समाप्तः ॥

No. 1144. दर्शपूर्णमासेष्टिहौत्रम्.

DARŚAPŪRṆAMĀSĒṢṬIHAUTRAM.

Size, $16\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 40. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 1101.

Complete.

Ritualistic directions for the Hōtṛ priest in relation to the Darśapūrṇamāsa sacrifice.

Beginning:

होतरेहीत्युक्तेऽध्वर्युः । होता—अस्या इष्टेः पञ्चदश सामिधेन्यः । वार्त्रघ्नावाज्यभागौ । अग्निश्च सोमश्च आज्यभागदेवते । अग्निर्विष्णुरग्नीषोमाविन्द्रो वैमृधश्च प्रधानदेवताः ।

End:

स्वाहेति समिधमाधाय ओंच मे स्वरश्च मे यज्ञोपच(चि)ते नमः(श्च) यत्ते न्यूनं तस्मै त उपयत्तेऽतिरिक्तं तस्मै ते नमः। इत्याहवनीयमुपस्थाय.

काण्डद्वयोपपाद्याय कर्मब्रह्मस्वरूपिणे ।
स्वर्गापवर्गरूपाय यज्ञेशाय नमो नमः ॥
इति नमस्कृत्य यथासुखं गच्छेत् ॥

Colophon:

दर्शपौर्णमासेष्टिहौत्रं समाप्तम् ॥

No. 1145. सोमौद्गात्रम्.

SŌMAUDGĀTRAM.

Substance, palm-leaf. Size, $11\frac{7}{8} \times 1\frac{1}{2}$ inches. Pages, 112. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

The other works herein are Vājapēyasamāni 57*a*, and Aparasūtram 64*a*.

A set of rules for the guidance of the Udgāṭṛ priest in the conduct of Sōma sacrifices.

Beginning :

यज्ञेश्वरशर्मणस्सोमो भविष्यति तत्रभवतौद्गात्रं कर्तव्यम्। आधानादिषु कर्मसु क ऋत्विजः ? श्रीरामशर्मादयः । के याजयन्ति ? ते चान्ये च। कच्चिन्नाहीनः ? नाहीनो ज्योतिष्टोमोऽग्निष्टोमस्सोमः । कच्चिन्न न्यस्तमात्वज्यम् ? न न्यस्तमार्त्विज्यम् । कच्चित्कल्याण्यो दक्षिणाः ? सन्ति कल्याण्यो दक्षिणास्सुरूपा बहुपणमूल्या एकविंशतिर्गावः । अथ जपति.

End :

उदवसानीयास्थाने पूर्णाहुतिकाले अपरेण गार्हपत्यमुपविश्य उद्वंशीयस्य साम्नः उद्वंश ऋषिः अनुष्टुप्छन्दः इन्द्रो देवता। गायन्ति त्वा गायत्रेणेति तृचं गायेत् ॥

No. **1146.** औद्गात्रप्रयोगः.

AUDGĀTRAPRAYŌGAḤ.

Pages, 188. Lines, 20 on a page.

Begins on fol. 82*a* of the MS. described under No. 42.

A work similar to the last in subject-matter.

The list of the contents of the work found herein is given below.

Beginning :

अत्यग्निष्टोमस्य सर्वमग्निष्टोमवत्। यज्ञायज्ञीयान्ते षोडशिसामस्तवनम्। विश्वरूपाज्योतिर्गानयोर्निवृत्तिः । धुरां च निवृत्तिः । सातीसांसुवः इडा वागिति पञ्चनिधनानां च निवृत्तिः। आ नो मित्रावरुणेतिवत् स्तवनम् । रेतस्यारथन्तर-(व)र्णेप्रकृतिवत् । अग्निष्टोमचमसभक्षणानन्तरमुद्गाता यस्मान्न जात इति षोडशिग्रहमवेक्षेत यस्मान्न जातः परो अन्यो अस्ति। य आ विवेश भुवनानि विश्वा । प्रजापतिः प्रजया संविदानः । त्रीणि ज्योतीꣳषि सचेत (चते) स षोडशी । इति षोडशिग्रहमवेक्ष्य स्वासनमुपविशति ।

End:

अग्ने सुखि(ख)तमे र (थे)देवा ईडित आवह। असि होता मनुाहतः। सुष(स)मिद्ध इति चतुर्ऋचे मधुमन्तन्नराशंसमिति ऋग्द्वयमस्ति। सुष(स)मिद्ध इति अत्रिवसिष्ठशुनककण्वसंकृतिवद्रिय (ध्यू) श्वानां तानूनपातिं नाराशंसिमन्येषामिति सूत्रकारेणोक्तम् ८ गर्भाणां गर्भिणां च गायत्रीच्छन्दः। पुष्कल ऋषिः। अग्निर्मित्र[ा] इन्द्राग्नी देवताः। गर्भाणां गर्भिणां च इमे वै लोका इति गायत्रब्राह्मणं बहिष्पवमानाज्यानां स तु वै यज्ञेन यजेत इति २ मयं सोम २ बहि।

औद्गात्रप्रयोगः॥

No. **1147.** दर्शपूर्णमासयाजमानप्रयोगः.

DARŚAPŪRṆAMĀSAYĀJAMĀNAPRAYŌGAḤ.

Pages, 14. Lines, 6 on a page.

Begins on fol. 58*a* of the MS. described under No. 1111.

The rules for the guidance of the Yajamāna in the Darśapūrṇamāsa-sacrifices as described in the 4th Praśna of Āpastamba's Śrauta-Sūtra.

Beginning:

अथ याजमानम्—

आहवनीयेऽन्वाधीयमानेऽग्निं गृह्णामि . वसून् . इमा . मयि । अन्तराग्नी तिष्ठन् जपति अन्तराग्नीत्येकया । इह प्रजा इह पशव इति द्वाभ्यां गार्हपत्यम्.

End :

प्राचो विष्णुक्रमान् क्रामति प्राङुदेत्य गोमतीञ्जपति जपति ॥

Colophon :

इति श्रीमत्यापस्तम्बसूत्रे तुरीयः प्रश्नः ॥

No. **1148.** मैत्रावरुणप्रयोगः.

MAITRĀVARUṆAPRAYŌGAḤ.

Pages, 68. Lines, 6 on a page.

Begins on fol. **1***a* which is wrongly numbered as 20 in the MS. described under No. 1111.

The 11th leaf is numbered wrongly as 45, and the succeeding leaves continue the numbering from the 45th.

The work under notice contains directions intended for the Maitrāvaruṇa in the following sacrifices :—Paśubandha **1***a*, Ukthya 11*a*, Āptōryāma 22*a*, Sarvapṛṣṭha 26*a*.

Beginning :

राजान ईशतोम् । प्रतिवाङ्सूर उदिते मित्रं गृणीषे वरुणम् अर्यमणं री(रि)शादसोम् । राया हिरण्यया मतिरीयमवकाय शवश्ये(से) ।

End :

इषं ज . नव्यम् । धी(धि)या स्याम रथ्यस्सदासोम् । त्रिः । उक्थं वाची न्द्रा(य)उशन्नुषण इति याज्या ॥

No. **1149.** वाजपेयसामानि.

VĀJAPĒYASĀMĀNI.

Pages, 14. Lines, 7 on a page.

Begins on fol. 57*a* of the MS. described under No. 1145

Those Sūktas from the Sāma-Vēda which are chanted in the Vājapēya sacrifice.

Beginning:

देवस्थानम्

हाँ च उपरीतोँ षा इ । चता सुताँसुताँ । हो क इ । त्रिः । हा च उवा तिः । स क होनरः । सोँडैमोँ यया उ शित्तामँ हावा इः । होइ । सत्यमोजः । दचौधन्वाँयोँनयोँ आ होँ इ । स्वक ज्योँतिः ।

End:

वारवन्तीयस्य ककुबुत्तराकारपक्षे गानप्रकारमाह । हि॑ । तुचो-वन्नश्वां औ हो हा इ । स्ता ।

* * * *

आँचोदेँवाँ । ना घा इह्वाराँ सा । हा । औं. इइ । औँताँठौहो । चाति । एपाहाँयांहा-होताइ । द्रा । पाप सर्वे ॥

No. 1150. ब्रह्मत्वदीपिका.

BRAHMATVADĪPIKĀ.

Pages, 50. Lines, 8 on a page.

Begins on fol. 146*a* of the MS. described under No. 1051.

Incomplete.

A work giving the ritualistic directions to the Brahman priest in conducting sacrifices.

Beginning:

वाणीं गणेशं वागीशं गिरिशं चण्डिकेश्वरम् ।
गिरिजामिन्दिरां गङ्गां प्रणम्य.

* * * *

वृत्तिं नारायणेरिताम् ।

. . . दृष्ट्वा तदनुसारेण . . ब्रह्मकर्मोच्यते . . ।

. . प्रथमं दर्शपूर्णमासयोरुच्यते — अथ ब्रह्माणं त्वां वृणीमह इति यजमानेनवृ[णी]तो भूत्वा वृतोऽस्मि करिष्यामीति सङ्कल्प्य.

End :

तदा वैश्वानरेष्टिं पूर्णाहुतिं वा जुहुयात् । यदि पवित्रं नश्येत् अग्नये पवित्रवत इष्टिं पूर्णाहुतिं वा जुहुयात् ।

Colophon

इति ब्रह्मत्वदीपिकायां प्रायश्चित्तानि समाप्तानि ॥

No. 1151. अवभृथतन्त्रम्.

AVABHṚTHATANTRAM.

Pages, 14. Lines, 7 on a page.

Begins on fol. 88*a* of the MS. described under No. 1035.

Incomplete.

Gives the concluding rites of sacrifices.

Beginning :

अवभृथस्य तन्त्रं प्रक्रमयति । या जाता इति परिस्तरणं तूष्णीं परिभोजनीमुलपराजीं च । नेध्मः वेदिं कृत्वोपवेषः । समूहन्ति परि-स्तृणीत देवा देवेषु कर्मणे वामित्यादि । एककपालं स्फ्यश्च द्वन्द्वम् इतराणि प्रकृतिवत् अन्वाहार्यस्थालीवर्जम् ।

End :

एता आदिक्षालनान्तं मैत्रावरुणदोहनम् ।
तप्ते दधि च लौकिक्यां तूष्णीं स्फ्यं सदसः पुरा ॥
प्रैषोऽनिध्मो ध्रुवा ग्राह्या प्रोक्षो वेद्यास्तरस्य च ॥
अन्तर्वेद्याद्यं प्राण(।)स्तरं दत्वाददीत च ।

No. 1152. अग्निष्टोमावभृथप्रयोगः.

AGNIṢṬŌMĀVABHṚTHAPRAYŌGAḤ.

Pages, 9. Lines, 7 on a page.

Begins on fol. 74*a* of the MS. described under No. 1120.

Complete.

The work is named पैर्णमासीतन्त्र in the margin of fol. 74.

This Prayōga follows the Śrautasūtra of Āpastamba in which the subject is treated in Khaṇḍas 19 to 25 in the 15th Praśna.

A work similar to the last, with special reference to the Agniṣṭōma-sacrifice.

Beginning:

अवभृथस्य तन्त्रं प्रक्रमयति । या जाता ओषधय इत्यादि तूष्णीं परिभोजनिमुलुपराजिश्च । नेध्मं वेदिकरणमुपवेषश्च अलङ्कृत्य परिस्तरणं देवा देवेषु कर्मणे वामित्यादिपात्रप्रयोगकाले एककपालं स्फचश्च (श्र)द्वन्द्वं प्रणीता प्राशित्रमिडापात्रान्वाहार्यस्थालीवर्जमितराणि प्रकृतिवत् ।

End:

तमग्निं परित्यज्य सङ्कल्पङ्करोति सायमग्निहोत्रम् . . मि । अध्वर्युर्धृष्ट्याधानादि . . . . . . सादयेत् । मार्जनान्तम् । काले प्रातर्होमः सन्तिष्ठतेऽग्निष्टोमोऽग्निष्टोमः ॥

No. 1153. आप्रिया.

ĀPRIYĀ.

Pages, 8. Lines, 9 on a page.

Begins on fol. 82*a* of the MS. described under No. 1035.

Complete.

Contains some Sūktas or hymns in praise of Vēdic dieties, which are recited during a sacrifice. They are called Prayājayājyas and are different for the different Gōtras.

Beginning :

कण्वाङ्गिरोऽगस्त्यशुनकविश्वामित्रोऽत्रिरेव च ।
वसिष्ठः कश्यपा वाध्र्यूजमदग्निर्यथाक्रमम् ॥

ये यजामहे सुसमिद्धो न आवह देवा अग्ने हविष्मते। होतः पावक यक्षि च वौ ॥ १ ॥

मधुमन्तं तनूनपाद्यज्ञं देवेषु नः कवे । अद्या कृणुहि वीतये ।

End :

अग्ने वह वरुणमिष्ट येन इन्द्रान्दिवो मरुतो अन्तरिक्षात् ।
सीदन्तु बर्हिर्विश्व आ(य)जत्रा स्वाहा देवा अमृता माद-यन्ताम् ॥

No. 1154. अरण्याधानम्.

ARAṆYĀDHĀNAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 102*a* of the MS. described under No. 1051.

Incomplete.

The ritual relating to the preparation of the wooden cup Araṇi for obtaining fire by friction.

Beginning :

यद्यग्निहोत्रे होमस्य करणे न शक्नुयात् तदा प्रातर्होमं समाप्य अरणि आधाय गार्हपत्यं प्रदीप्य होमकरणाशक्तौ निमित्ताद्वा वि(म)थ्यं-मानमग्निमरण्यारोपणं करिष्ये इति सङ्कल्प्य अ(यं) ते योनिरृत्विजो यत इति

End:

पिण्डपितृयज्ञोऽपि विच्छिन्नस्स्यात्तदा [illegible]यज्ञसङ्कल्पात् पूर्वं पिण्डपितृयज्ञलोपप्रायश्चित्तार्थं सप्तहोतारं होष्यामीति संकल्प्य महाहविर्होतेत्याहवनीयेन ग्रहान् हुत्वा यथापूर्वं कुर्यात् ॥

No. 1155. यज्ञविधिः.

YAJÑAVIDHIḤ.

Pages, 35. Lines, 5 on a page.

Begins on fol. 162*a* of the MS. described under No. 1116.

Complete.

Certain rituals relating to sacrifices are dealt with herein.

Beginning:

अथातो यज्ञविधिं व्याख्यास्यामो यजमानस्याग्निर्मे होतेति देवमृत्विग्वरणमथ मानुषाणां ज्योतिष्टोमेनाग्निष्टोमसंस्थेन रथन्तरपृष्ठेन गवां द्वादशशतदाक्षिणेनाह(वनी)यस्यते(स्यान्ते) तत्रभवता अ(औ)द्गात्रं कर्तव्यमित्युक्ते क ऋत्विजः के याजयन्ति ।

End:

इष्टौ तत्स्थानीयायां पूर्णाहुतावपरेण गार्हपत्यमुपविश्य गायन्ति त्वेत्युद्वंशीयं तृचे गायेदनुष्टुब्विश्वे देवाः ॥

Colophon:

यज्ञविधिस्समाप्तः ॥

No. 1156. महावालभित्.

MAHĀVĀLABHIT.

Pages, 43. Lines, 6 on a page.

Begins on fol. 35*a* of the MS. described under No. 1111.

Incomplete.

This is a hymn which is chanted in certain sacrifices.

Beginning:

हीं भूर्भुवस्वरोम् शोशोंूसा वो मे ह्यू षु ब्रवा . गिरः ।
एभि . भोम् । त्रिः यत्र क च . . त्तरम् ।

End:

इतं ऊर्द्धम् औण्ड्यन्यस्यापि समानम् ।

प्रति ते दस्यवे प्रकाराधो अदश्य हृदयं द्यौर्न प्राथिनाशवोम् ।
दशमस्यं पौतक्रत(व)स्सहस्रादस्यावबृकः ।

नित्याद्रायो अमंहतोम् । शतम्मे गर्दभानां शतमूर्णावतीनां शतं
दासाम् अतिसृजोम् ॥

No. **1157.** सर्वतोमुखाप्तोर्यामऋषिच्छन्दोदेवता.

SARVATŌMUKHĀPTŌRYĀMA-ṚṢICCHANDŌDĒVATĀ.

Pages, 14. Lines, 8 on a page.

Begins on fols. 190*a* and 196*a* of the MS. described under No. 1116.

Contains the names of the Ṛsis, of the metres and of the deities connected with the hymns used in the conduct of the sacrifices known as Sarvatōmukha and Aptōryāma.

The latter is complete.

Beginning:

अथ बहिष्पवमानस्य नवानामृचां गायत्री छन्दः । पुष्कल ऋषिः ।
सोमो देवता । इमे वै लोका गायत्रमिति

* * * *

नस्य विधायकब्राह्मणम् । मनोहिङ्कार इत्युद्गीथोपासकस्य सर्वं पृथि.
व्यन्तरिक्षं द्यौः सर्वा दिश इति

ध्येयानि । अग्नेरुद्गीथो निरुक्तः प्रजापतेः निरुक्तः सोमस्य
मृदु श्लक्ष्णं वायोः श्लक्ष्णं बलवदिन्द्रस्य क्रौञ्चं बृहस्पतेः ।

End:

अचोदस इत्युद्दद्धार्गवस्य । जगती छन्दः । भृगुऋषिः । सोमो देवता । गायन्ति त्वेत्युद्वशीयस्य अनुष्टुप् छन्दः । विश्वे देवा ऋषयः । अग्निर्देवता.

No. **1158.** आश्विनसहस्रम्.

ĀŚVINASAHASRAM.

Pages, 86. Lines, 9 on a page.

Begins on fol. 3*a* of the MS. described under No. 1143.

Complete.

Sūktas in praise of the Aśvins, &c., intended to be recited in sacrifices.

Beginning:

संस्थितेष्वाश्विनाय स्तुवते शंसिष्यन् विसंस्थितसञ्चरेण निष्क्रम्याग्नीध्रीये जान्वाच्याहुतीर्जुहुयात् । अग्निरज्मि गायत्रेण छन्दसा तमश्यान्तमन्वारभे । तस्मै मामवतु तस्मै स्वाहा । अग्नये.

End:

एवा नो अद्य समना समानानुशन्नग्न उशतो यक्षि देवान्वौ । सोमस्याग्रे वीहि वौ । गृह आश्विनश्लेत् युवन्देवाः ऋतुना यदि नाधीयात् पुराणमोकः सख्यं शिवं वाम् । इति ॥

No. **1159.** क्रतुप्रायश्चित्तम्.

KRATUPRĀYAŚCITTAṀ.

Pages, 16. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 1116.

Complete.

Expiatory rites for remedying errors of commission or omission in the conduct of sacrifices.

Beginning:

प्रायश्चित्तान्युच्यन्ते । प्रथमं तावत् प्रस्तोता परिसामानि स्खलनं चेत्तदा पुनर्गीत्वा महाव्याहृतीर्जुहुयात् । विशेषस्तु इष्ट्यङ्गसाम्नां भ्रेषे विष्णवर्चे(ष्णवृचे)न जुहुयात् । प्रस्तोता प्रवर्ग्योद्वासनात् पूर्वं यानि प्रायश्चित्तानि भवन्ति तानि सर्वाणि प्राग्वंशे आहवनीये जुहुयात् । तत ऊर्ध्वमुत्तरवेद्यग्नौ सर्वे यजुर्मन्त्राणां विघ्ने सति तत् पुनर्जपित्वा महाव्याहृतीर्जपेयुः ।

End:

ज्योतिष्टोमेन तत् सम्पन्नम् । सप्तबृहत्या यो(ये) माध्यन्दिनादतिरिच्य-न्ते तावत्तृतीयसवनाल्लुप्यते । तत् संपन्नम् । तृतीयसवनादतिरिक्ता विष्णोरिशिपिविष्टवतीषु बृहता स्तुयुः । त्रिवृता स्तोमेनोपरिष्टात् सन्धेः ॥

Colophon:

इति क्रतुप्रायश्चित्तम् ॥

No. 1160. आश्वलायनगृह्यसूत्रम्.

ĀŚVALĀYANAGṚHYASŪTRAM.

Substance, palm-leaf. Size, $13\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 72. Lines, 6 on a page. Character, Nandināgari. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Āśvalāyanagṛhyapariśiṣṭa 37*a*.

Contains 4 Adhyāyas.

The rites to be performed by the householder with the household fire are described and explained herein as they appertain to the Ṛgvēdins.

Beginning:

उक्तानि वैतानिकानि गृह्याणि वक्ष्यामः । त्रयः पाकयज्ञाः हुता अग्नौ हूयमाना अनग्नौ प्रहुता ब्राह्मणभोजने ब्रह्मणि हुताः । अथाप्यृच उदाह-

रन्ति यस्समिधा य आहुतीर्योवेदेनेति । समिधमेवापि श्रद्दधान आद-दन्मन्येत यज इदमिति नमस्तस्मै य आहुत्या यो वेदेनेति विद्यैवाप्यास्ति प्रीतिस्तदेतत् पश्यन् ऋषिरुवाच ।

End:

बर्हिराज्यं चानुप्रहृत्य प्रतिधूमं गाव आनयेत् । शान्तातीयं जपन् पशूनां मध्यमियान्मध्यमियात् । नमश्शौनकाय नमश्शौनकाय नमः परमऋषिभ्यो नमः परमऋषिभ्यः ॥

Colophon:

समाप्तस्तुरीयाध्यायः ॥

No. **1161.** आश्वलायनगृह्यसूत्रम्.

ĀŚVALĀYANAGṚHYASŪTRĀM.

Substance, palm-leaf. Size, 13 × 1½ inches. Pages, 14, Lines 9 on a page. Character, Grantha. Condition, good. Appearance, new.

Contains the 2nd Adhyāya, and 6 Khaṇḍas of the 3rd Adhyāya.

No. **1162.** आश्वलायनगृह्यपरिशिष्टम्.

ĀŚVALĀYANAGṚHYAPARIŚIṢṬAM.

Pages, 98. Lines, 5 on a page.

Begins on fol. 37*a* of the MS. described under No. 1160.

Contains two Adhyāyas. A supplement to the last described work.

Beginning:

अथास्मिन्नाश्वलायनगृह्ये यानि क ।नि चिदन्यत्रोक्तानिही(नीहे)च्छता चार्येणानुमतानि ज्ञापितानि यानि प्रोक्तप्रदर्शितक्रियाणि तानि सर्वाण्यवबोधाय यथावदभिधास्यामः—कर्ता स्नातो धौतानार्द्रवासा यज्ञोपवीत्याचान्तः प्राङ्मुख आसीनो दक्षिणाङ्क(।)री समाहितो मन्त्रान्ते कर्म कुर्वीत.

End :

अथ पितॄणां ततो मातामहानामिति त्रितयच्छिन्ति। तस्माज्जीव-पि(त्पि)ता सुतसंस्कारेषु मातृमातामहयोः कुर्यात्तस्याश्च जीवत्यां मातामहस्य कुर्यात् कुर्यात् ॥ २६ ॥ अथ पितृमेधः अथाभ्युदयिके अथ ब्राह्मणाना-चमयेत् ॥

* * * *

भगवन् केतो। भगवन् राहो। भगवन् शनैश्चर। भगवन् भार्गव। भगवन् बृहस्पते। भगवन् सौम्य सौम्याकृते। भगवन्नङ्गारकाग्न्या-कृते। भगवन् सोम। भगवन्नादित्य। अथावाहनमन्त्रः। अथार्चनमा-चार्यः। अथार्चनाङ्गानि। अथास्य संभाराः। अथ ग्रहयज्ञः। अथ ग्रहयज्ञो भगवन्‌श नैश्चराथहविरहात्षट्क (?)॥

Colophon :

इत्याश्वलायनगृह्यपरिशिष्टे द्वितीयोऽध्यायः ॥

No. 1163. आश्वलायनगृह्यकारिका.

ĀŚVALĀYANAGṚHYAKĀRIKĀ.

Substance, paper. Size, 8 × 6⅜ inches. Pages, 138. Lines, 20 on a page. Character, Telugu (very neatly written). Appearance, new. Copied for the Library in 1894.

This is a Kārikā by Śākala. *Vide* Dr. Burnell's Catalogue of the Palace Library at Tanjore, page 14, for contents and remarks.

Beginning :

शाकलोऽहं प्रयोगञ्च वक्ष्ये बह्वृचकर्मणां।
कारिकायामनुक्तं यत्र(त्त)देव हि समन्त्रकम् ॥
आचार्यस्य च वै यावत्सक्त(त्क)र्माध्वप्रदर्शिनी।
प्रोच्यते कारिकेतीह सद्भिश्चैव तु लौकिके ॥

अपानपाणिपादस्य शोधनं शुद्धिकारणम् ।
सर्वेषामपि वर्णानामिदमादौ प्रचक्षते ॥
पादं प्रक्षालयेद्विप्रः शौच एव हि दक्षिणम् ।
पश्चात्सव्यमथान्यत्र सव्यमादौ सदक्षिणम् ॥
सुस्नातः कृतसन्ध्यस्तु शुचिर्भूत्वा समाहितः ।
गृह्योक्तश्चारभेत्कर्म नित्यन्नैमित्तिकञ्च हि ॥
सन्ध्याहीनो न तत्कुर्यात् प्राप्तञ्चेत्सन्ध्ययोर्द्वयोः ।
शुभं वाप्यशुभं कर्म कृतञ्चेन्निष्फलं भवेत् ॥
कृतसन्ध्योऽधिकारी स्यात् माङ्गल्ये मृतकेऽपि च ।
सन्ध्ययोरुभयोश्चैव नान्यथा कर्तुमर्हति ॥
पुत्रे जाते पिता कुर्याज्जातकर्म विधानतः ।
न चेत्स्यात्सन्निधौ कर्ता कारयेन्नामकर्मणि ॥
नान्दीश्राद्धं पिता कुर्यात् स्वस्तिवाचनपूर्वकम् ।
आदौ चैव शुभार्थी तु सर्वसंस्कारकर्मणाम् ॥
बहूनां क्रियमाणानां संस्कार्यस्य च कर्मणाम् ।
नान्दीश्राद्धं भवेदेवं तत्तत्कर्म भवेत्पृथक् ॥

End :

ब्रह्महत्यादिकं पापं ब्राह्मणः कुरुते यदि ।
स दोषघातनिरतः पतितः परिकीर्तितः ॥
प्रमादाच्चेद्भवेदेकं पृथक् देहं द्विजस्य तु ।
तच्चैवाप्सु क्षिपेदङ्गकरपादाङ्गुलादिकम् ॥
एवंभूतस्य विप्रस्य मरणञ्जायते यदि ।
कुर्यात्तस्य सुतः कर्म प्रायश्चित्तपुरस्सरम् ॥
तारयेद्यः पितॄन् पापात्स एव तरति स्वयम् ।
इत्येवङ्कथितो धर्मश्शाकलेन महर्षिणा ॥

इति शाकलाचार्यकृतकारिकायामन्त्येष्टिप्रकरणं समाप्तम् ॥

मातृपूर्वं भवेच्छ्राद्धं सुतसंस्कारकर्मणि ।
तदेव पितृपूर्वं स्यादात्मसंस्कारकर्मसु ॥

Colophon:

इति शाकलकारिका सम्पूर्णा ॥

No. 1164. आश्वलायनगृह्यकारिका.

ĀŚVALĀYANAGṚHYAKĀRIKĀ.

Substance, palm-leaf. Size, $16\frac{1}{4} \times 1\frac{1}{2}$ inches. Pages, 56. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 120*a*. The other work herein is Dharmapravṛtti 1*a*.

Contains 3 Adhyāyas in verse.

The work is called Āśvalāyanagṛhyapradīpikā in the colophon. The author of the work is mentioned as Bhaṭṭa Kumārilasvāmin.

Beginning:

आश्वलायनमाचार्यं नत्वा तद्गृह्यकर्मणाम् ।
प्रयोगं वच्मि सङ्क्षेपात् वृत्तिकारेण भाषितम् ॥
प्राणानायम्य सङ्कल्प्य परितस्थण्डिलं शुचिः ।
अधिकं वेषुमात्रं वा गोमयेनोपलिप्य च ॥
यज्ञियं शकलं किञ्चिदादधीत ततः परम् ।

End:

गृहे स्नानं प्रशंसन्ति स्नानमुष्णेन वारिणा ॥
मृते जन्मनि सङ्क्रान्ते श्राद्धे जन्मदिने तथा ।
अस्पृश्यस्पर्शने चैव न स्नायादुष्णवारिणा ॥
पुष्ये च जन्मनक्षत्रे व्यतीपाते च वैधृतौ ।
अमायान्तु नदीस्नानं पुनात्यासप्तमङ्कुलम् ॥

इत्याश्वलायनगृह्यप्रदीपिकायां कारिकासु तृतियोऽध्यायः ॥
शुभकृद्वत्सरे चैव ग्रीष्मर्तौ वृषभे रवौ ।
शुद्धे वै ज्येष्ठमासे तु द्वितीयायान्तिथावियम् ॥
सौम्यवासरयुक्तायां लिखिता गृह्यदीपिका ॥
इमन्दिन्दुपुरीशाय कोसलेशाय धन्विने ।
सीतालक्ष्मणयुक्ताय मायातीताय ते नमः ॥

No. **1165.** आश्वलायनगृह्यकारिका.

ĀŚVALĀYANAGṚHYAKĀRIKĀ.

Substance, palm-leaf. Size, 16¼ × 1¼ inches. Pages, 62. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Same as the last.

Contains Adhyāyās 1 to 4. In the beginning two leaves have been lost, and the first existing leaf finishes स्थालीपाकविधि and begins स्वस्तिवाचन.

Begins on fol. 1*a*. The other works herein are: Varamaṅgalāṣṭakam 32*a*, Smṛtivacanāni 33*a*, Kākamaithunaśāntiḥ 36*a*, Mahōtpātaśāntiḥ 36*a*, Mṛtyuñjayamantraḥ 39*a*, Kapōtaśāntiḥ 45*b*, Kadalīśāntiḥ 46*a*, Utpalaśāntiḥ 46*b*, Śithilīśāntiḥ 48*a*, Amāvāsyāprasūtiśāntih 49*b*, Mūlāślēṣaśasāntiḥ 51*a*, Jyēṣṭhānakṣatraśāntiḥ 59*a*, Sadantajananaśāntiḥ 61*a*, Dantajananaśāntiḥ 62*a*, Sinīvaliśāntiḥ 62*b*, Kuhūśāntiḥ 63*a*, Grahaṇaśāntiḥ 65*a*, Gōmahiṣyādijananaśāntiḥ 66*a*, Ājyāvēkṣaṇalakṣaṇam 67*a*, Rajaśvalāśāntiḥ 67*b*, Śrāddhabrāhmaṇādiniyamaḥ 72*a*.

End:

ब्राह्मणान् भोजयित्वा तान् स्वस्तीति वचनं वदेत् ।
गौ(गो)ण(क्षां)स्याहतवस्त्राणि कर्ता तेभ्यो ददात्यथ ॥

Colophon:

इति आश्वलायनगृह्यकारिकासु चतुर्थोऽध्यायः ॥

No. 1166. आश्वलायनस्मार्तप्रदीपिका.

ĀŚVALĀYANASMĀRTAPRADĪPIKĀ.

Substance, plam-leaf. Size, 14⅞ × 1½ inches. Pages, 76. Lines, 9 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains the first two Adhyāyas. The first Adhyāya consists of 25 and the second of 21 Khaṇḍas. The total number of Khaṇḍas is 46. The number of Khaṇḍas in the MS. described next is 42 The 8th, 22nd, 23rd, 24th and 25th have no corresponding divisions in this latter codex.

The ritualistic procedure relating to the house-hold rites as observed by the followers of Āśvalāyana-sūtra. The author refers to Nārāyaṇa, a commentator on this Sūtra.

Beginning:

अथाश्वलायनानां सुखावबोधाय नारायणीयादिग्रन्थानवलोक्य लक्ष्मीनृसिंहं नत्वा स्मार्तप्रदीपिकां वक्ष्ये—कर्ता स्नातो धौतानार्द्रवासा नैकवासा बद्धशिखो यज्ञोपवीत्याचान्तः कृतनित्यक्रियः शुचौ देशे प्राङ्मुख आसीनः कर्म कुर्यात् ॥

* * * *

इति स्मार्तप्रदीपिकायां प्रथमोऽध्यायः ॥

End:

अथास्य शिखे विमुञ्चति, अथ होमः, अथानयोराद्राक्षतारोपणं, हिरण्यगर्भसं, . . . द्वाहः, आयुष्यं वर्चस्यम्, अथ समावर्तनम् अथ समावर्तनं विवाहव्रत एकादश ॥

No. 1167. आश्वलायनस्मार्तप्रदीपिका.

ĀŚVALĀYANASMĀRTAPRADĪPIKĀ.

Substance, plam-leaf. Size, 12⅞ × 1¼ inches. Pages, 92. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 48*a*.

The other works herein are Śabdarūpāvaliḥ 1*a*, Putrasvī. karaṇaprayōga 8*a*, Āśvalāyanaprayōgamantrāvaliḥ 9*a*, Upanayanamaṅgaḷāṣṭakam 94*a*, Lakṣmipatimaṅgalāṣṭakam 94*b*, Navagrahamaṅgalāṣṭakam 95*a*, Ṣōḍaśōpacāravidhiḥ 96*a*.

Contains 42 Khaṇḍas. The 11th and 12th Khaṇḍas are omitted.

Beginning:

Same as in the work described under the last No.

End:

तमग्निं विसृज्य मानुषीं कन्यां विधिना विवहेत् । पुत्रपौत्रवान् भवति ॥

कल्यान्वयप्रतीतेन कौशिकान्वयजन्मना ।
नृसिंहाख्येन लिखिता आश्वलायनदीपिका ॥
आश्वलायनसूत्रस्य दीपिकाख्यं निबन्धनम् ।
प्रख्यातिमेतु सर्वत्र यावदाचन्द्रतारकम् ॥

कुल्यान्वयाम्भोधिसुधाकरस्य
नृसिंहपुत्रस्य दयान्वितस्य ।
नृसिंहनामार्यसुतो नृसिंहः
विलिख्य संपादितमादरेण ॥

श्रीलक्ष्मीनृसिंहस्मार्तप्रदीपिकाया मन्त्रावल्याश्च पत्रसङ्ख्या षडशीतिः ॥

No. 1168. जैमिनिगृह्यसूत्रम्.

JAIMINIGṚHYASŪTRAM.

Substance, paper. Size, 11 × 8⅝ inches. Pages, 49. Lines, 16 on a page. Character, Dēvanāgari. Condition, good. Appearance, new. Transcribed for the Library in 1897.

Begins on fol. 13*a*. The other work herein is Jaiminigṛhyasūtrakārikā 1*a*.

Refer to pages 2 and 70 of M. Seshagiri Sastri's Report on a Search for Sanskrit and Tamil MSS. for the year 1896-97, No. 1, Madras.

No. 1169. जैमिनिगृह्यसूत्रकारिका.

JAIMINIGṚHYASŪTRAKĀRIKĀ.

Pages, 25. Lines, 16 on a page. Transcribed for the Library in 1897.

Begins on fol. 1*a* of the MS. described under No. 1168.

Refer to pages 3 and 71 of M. Seshagiri Sastri's Report on a Search for Sanskrit and Tamil MSS. for the year 1896-97, No. 1, Madras.

No. 1170. जैमिनिगृह्यसूत्रव्याख्या.

JAIMINIGṚHYASŪTRAVYĀKHYĀ.

Substance, paper. Size, $11\frac{7}{8} \times 9\frac{3}{4}$ inches. Pages, 109. Lines, 17 on a page. Character, Telugu. Condition, good. Appearance, new. Transcribed for the Library in 1894.

Contains the commentary of Śrīnivāsa on the 1st Praśna of 25 Khaṇḍas and on 5 Khaṇḍas of the 2nd Praśna. Thus 4 Khaṇḍas are wanting at the end.

Refer to pages 7 and 150 of M. Seshagiri Sastri's Report on a Search for Sanskrit and Tamil MSS. No. 2, for the year 1893-94.

No. 1171. खादिरगृह्यसूत्रम्.

KHĀDIRAGṚHYASŪTRAM.

Pages, 9. Lines, 9 on a page.

Begins on fol. 10*a* of the MS. described under No. 63.

Contains the first 11 Khaṇḍas of the Sūtra.

The work consists of 5 Paṭalas of which this codex contains Paṭalas 1 and 2, and 1 Khaṇḍa of the 3rd Paṭala. This is the Gṛhya-sūtra adopted by the followers of Drāhyāyaṇa-śrauta-sūtra.

Beginning:

अथातो गृहा(ह्य)कर्माण्युदगयनपूर्वपक्षः पुण्याहेषु प्रागावर्तनादह्नः का - लेऽनादेशे अपवर्गे यथोत्साहं ब्राह्मणानाशयेत् । यज्ञोपवीतं सौत्रं कौशं वा ग्रीवायां प्रतिमुच्य[।] दक्षिणं बाहुमुद्धृत्य यज्ञोपवीती भवति ।

End:

भुवनमिति पुंसेऽग्रे लोहितेनेत्यनुमन्त्रयेति तन्ति प्रसारितामियन्ती-दि(मि)ति ॥

Colophon:

गृह्यं समाप्तम् ॥

No. **1172.** खादिरगृह्यसूत्रम् (सवृत्ति).

KHĀDIRAGṚHYASŪTRAM WITH COMMENTARY.

Pages, 92. Lines, 25 on a page.

Begins on fol. 57*a* of the MS. described under No 1078.

Contains the Sūtra of Khādirācārya, with the Vṛtti of Rudraskanda, son of Nārāyaṇa, a resident of Makhavāṭa, on 4 Paṭalas.

Complete.

Beginning:

अथातो गृह्यकर्माणि। अथ अनन्तरं कस्मादनन्तरम् ? देवसवितरित्या-दिमन्त्रवच्छाखाध्ययनात् यतोऽनधीतवेदस्य मन्त्रापरिज्ञानात् वक्ष्यमाणेषु वाक्येषु कर्मानुष्ठानयोग्यतया प्रतिपत्तुमशक्यमतस्तदनन्तरमिति गम्यते ।

End:

संवत्सरमतीत्यागतान् पुनर्यज्ञविवाहयोश्च अर्वागपि संवत्सरादागता-नर्हयेत् ॥

द्विरुक्तिः पटलसमाप्त्यर्था ॥

नारायणस्य पुत्रेण मखवाटनिवासिना ।
रुद्रस्कन्देन सङ्क्षेपात् व्याख्यातं गृह्यशासनम् ॥

Colophon:

इति खादिराचार्यकृतगृह्य(स्य) रुद्रस्कन्दकृतायां गृह्यवृत्तौ चतुर्थस्य पटलस्य चतुर्थः खण्डः ॥

गृह्यवृत्तिस्संपूर्णा ॥

No. 1173. द्राह्यायणगृह्यपरिशिष्टम्.

DRĀHYĀYAṆAGṚHYAPARIŚIṢṬAM.

Substance, paper. Size, 11 × 8⅝ inches. Pages, 96. Lines, 14 on a page. Character, Dēvanāgari. Condition, good. Appearance, new. Transcribed for the Library in 1896.

Complete.

A supplement to the last described work.

Beginning:

अथातश्शौचविधिं व्याख्यास्यामः । ग्रामाद्दूरं गत्वा यज्ञोपवीतिं (तं) शिरसि दक्षिणे कर्णे वा मृत्तिकां गृह्णाति काष्ठमन्तर्धायोपविशेत् अहरुत्तरतो निशायां दक्षिणत उभयोस्सन्ध्ययोरुदङ्[च]मुखो ना . . न गोवृक्षमूलपर्वतमूले चतुष्पथेऽन्य[ा]गारे गवां गोष्ठे पुलिनवर्जं देवगृहे वल्मीके मूषिकस्थले प्रत्यग्नि प्रतिसूर्यं च प्रतिगृहं प्रतिब्राह्मणमित्याह भगवान् नारायणिः.

End:

मारुतमसि म[ा]रुतामोजोऽपद्धा(पान्धा)रां भिन्धि । अपः क्षिप्रं विसर्जय विसर्जय पर्जन्य एहि एहि इन्द्र सदास्सु(स्रासु) वृष्टिं देहि पर्जन्य सद्यो वर्षधारां स्रावय स्रावयेति ॥

Colophon:

पर्जन्यकल्पस्समाप्तः ॥

No. 1174. बोधायनगृह्यसूत्रम्.

BŌDHĀYANAGṚHYASŪTRAM.

Substance, paper. Size, $12\frac{3}{8} \times 7\frac{3}{4}$ inches. Pages, 33. Lines, 40 on a page. Character, Grantha. Condition, good. Appearance, new. Purchased in 1894.

Begins on fol. 1*a*.

